# Shri Parthasarathi Stavah

# શ્રીપાર્થસારથિસ્તવઃ

## Document Information

Text title : Shri Parthasarathi Stavah

File name : pArthasArathistavaH.itx

Category : vishhnu, krishna

Location : doc_vishhnu

Transliterated by : Muthuraman Krishnamurthy

Proofread by : Muthuraman Krishnamurthy, PSA Easwaran

Description/comments : Encoded from Grantha Tamil text Parthasarathi Stavah

Latest update : September 15, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# શ્રીપાર્થસારથિસ્તવઃ

શ્રિયૈ નમઃ ।
શ્રીમતે રામાનુજાય નમઃ ।
શ્રીમન્નૃસિંહવરદ શ્રીરઙ્ગેશરઘોત્તમૈઃ
મૂર્તિભેદૈશ્શુભૈસ્સસ્વ્ય જયત્યર્જુનસારધિઃ
આવિયુર્ શ્રીનિવસચાર્યવિરચિતઃ
શ્રીપાર્થસારથિસ્તવઃ
પ્રપન્નસઞ્જીવનં
યતીન્દુગુણચન્દ્રિકા ચ

## પ્રથમો ભાગઃ ।

શ્રીઃ ।
શ્યામાભં દ્વિભુજં કિરીટરુચિરં શઙ્ખારિરાજત્કરં
 રાજીવાયતલોચનં વિકસિતામ્ભોજોપરિસ્થાયિનમ્ ।
શ્રીવત્સાઙ્કિતવક્ષસં પરિલસદ્રાકેન્દુબિમ્બાનનં
 ધ્યાયામો હૃદિ વાસુદેવમિતરૈઃ પૂર્ણૈર્ગુણૈરઞ્ચિતમ્ ॥

પદ્મસ્થામવકુઞ્ચ્ય દક્ષિણપદં સંસ્થાપ્ય વામં પદં
 શ્યામાભાં વરદાયિદક્ષિણકરાં વિસ્તાર્ય બાહ્વન્તરામ્ ।
રત્નાભાં દધતીં પ્રસૂનવિલસત્કાલોર્દ્ધ્વભાગાં હૃદિ
 ધ્યાયામો ઘનપીવરસ્તનભરાં ભૂષોજ્જ્વલાં રુક્મિણીમ્ ॥

શ્રિયૈ નમઃ ।
શ્રીરુક્મિણિસમેતપાર્થસારથિપરબ્રહ્મણે નમઃ ।
શ્રીમત્કૈરવિણી ક્ષેત્રા કલ્પકં કલ્પકં નૃણામ્ ।
રુક્મિણીલતિકાશ્લિષ્ટં પાર્થસારથિમાશ્રયે ॥ ૧ ॥

આચાર્યસ્સર્વશેષી સ યસ્માત્તસ્માદ્ધૃતાત્મનામ્ ।

અન્યત્ર ન પતેદેવ મત્કૃતાનતિ સન્તતિઃ ॥ ૨ ॥

યત્તદુક્તમવિજ્ઞાતં શ્રુતિભિઃ પ્રતિભાવતામ્ ।
અજ્ઞાત્વાદેવ સંપ્રાપ્તે વેત્તૃત્વં વક્તૃતા ચ મે ॥ ૩ ॥

અધિકારોઽત્ર નોવેતિ કલ્પના ન હરિસ્તુતૌ ।
પશ્યન્તુ સાધુ વિબુધાઃ તાવત્કાલફલાનયમ્ ॥ ૪॥

અથવા કુરુ કાધીશ પદપદ્મમધુદ્રવૈઃ ।
નિર્ધૂતતાપવંશોત્થઃ નાર્હામિ ન હરિસ્તુતૌ ॥ ૫ ॥

યદ્વા રમાનૃહરિકારિજદૃષ્ટિતીર્ણ-
    માયાપ્રવાહવિભવો મમતાવિહીનઃ ।
અત્યન્તશેષમતિરાત્મપતીક્ષણેન
    સ્તોત્રાય સત્કુલપતેર્યતતે જનોઽયમ્ ॥ ૬ ॥

યદિ વા પઞ્ચષાશ્શ્લોકાઃ આરબ્ધાઃ પરમાણવઃ ।
આહ્વયે તાર્કિકાન્ સાધૂન્ અણુકારણવાદિનઃ ॥ ૭ ॥

યદ્વા શ્રીપતિસઙ્કલ્પવિશ્વહેતુત્વવાદિનઃ ।
આશ્રયે નિગમાન્તાર્યાન્(૧) જ્ઞાનવત્ખ્યાપિતાત્મકાન્ ॥ ૮॥ var (૧) ત્રય્યન્તવૃદ્ધાન્ ॥

અહો નુ વિશ્વપતિના સ્વતન્ત્રેણાઽસ્વતન્ત્રધીઃ ।
પ્રવેશિતોઽસ્મિ સુદૃઢં ગુણરત્નાકરે નિજે ॥ ૯ ॥

યદ્વત્ખે મરુતઃ સુરાસુરગણાઃ કાન્તાઃ સુરાણાં સ્ત્રિયઃ
    જ્યોતિશ્ચક્રમથાણ્ડજાશ્ચ શશભૃત્સૂર્યસ્તદન્યે ગ્રહાઃ ।
અન્યે સત્યપરાયણા મુનિગણા યે ચાપિ દિવ્યર્ષયઃ
    તે ચિન્તાં ન ચ યન્તિ યાન્તિ ચ પુનર્યાવત્ફલાવિષ્કૃતિ ॥ ૧૦॥

યદ્વા સદાર્યપરિવીક્ષણલબ્ધહૃદ્ય
    જ્ઞાનપ્રદીપવિલસદ્ધૃદયાવકાશઃ ।
રાજાધિરાજયદુરાટ્-ચરિતામૃતાબ્ધિ-
    રત્નાનિ તાનિ કલયામિ યથા સ્વશક્તિ ॥ ૧૧ ॥

તમોહન્તા કૃષ્ણઃ ગગનચરતેજોવિલસિતઃ
    નિરુન્ધન્ દ્રષ્ટૄણાં નયનપથનિમ્નોઽન્તતયિયમ્ ।
મનુષ્યાનન્યાન્વા નિજનિજપદસ્થાંશ્ચ કલયન્
    કથં તદ્ધર્મ્માસૌ જલધિસુતયા ભાતિ સકશઃ ॥ ૧૨ ॥

ફેનૈઃ પુષ્પૈસ્સુકલિતમહાવીચિભિઃ
    દોર્ભિરુચ્ચૈર્લક્ષ્મીસ્થાનાચિતસુહૃદયો ।
વારાંરાશિઃ કિમેષઃ સત્ત્વસ્તોમાનજહદ       var  વારિરાશિઃ
મલાઙ્ગોઽયં વાથ કૃષ્ણઃ શ્વાસોદ્ભેદા
    હતસુરરિપુઃ ચિત્રધામૈકરાશિઃ ॥ ૧૩ ॥

કલ્પસ્તોમઃ પ્રસૂનૈરસુસુપરિમળૈર્ભુષણૈર્ભુષિતો વા
    શાખાલક્ષોપજુષ્ટો દ્વિજવરનિવહૈરાત્તગાનૈર્ગરિષ્ઠઃ ।
સૂર્યેન્દુભ્યામમુક્તઃ સ્વપદનતિમતાં છાયયા તાપહારી
    હન્તાયં લોકનાથઃ નતભવહરણાભીતિમુદ્રાવિલાસઃ ॥ ૧૪ ॥

કિં વા વિષ્ણુપદસ્થમેઘનિવહઃ વિદ્યુચ્છ્રિયા ભૂષિતઃ
    સન્તપ્તાખિલતાપહૃન્નિજગુણો દૃષ્ટસ્સદૈવોન્મુખૈઃ ।
અદ્ધા દિક્ષુવિદિક્ષુ કીર્ત્તિકલિતઃ દોષૈરજુષ્ટસ્સ્વતઃ
    યદ્વેદં સુદિનં યદીક્ષણદિનં કૃષ્ણશ્શ્રિયા મોદતે ॥ ૧૫ ॥

બહુળપદસુજુષ્ટઃ છન્દસાં વાથરાશિઃ
    નિખિલજનપવિત્રાત્મીયશબ્દપ્રચારઃ ।
બહુમુખભુજશખાકલ્પિતાશેષભોગો-
    ઽનવરતકલિતશ્રી શ્રીસખઃ પાર્થસૂતઃ ॥ ૧૬ ॥

સુરાણામાસ્થાનં વિવિધચિદચિદ્બૃન્દનિલયઃ
    સદા ગીતાનન્દપ્રકટિતમહાત્મીયવિભવઃ ।
સદાઽઽગત્યાશ્લિષ્ટઃ સકલજનરક્ષામતિપદં
    સુમેરુર્વા યદ્વા હરિરખિલનિર્મ્માણનિપુણઃ ॥ ૧૭ ॥

રથ ઇવ કલિતાક્ષો યોજિતાત્મીયચક્રઃ
    રિપુદમનપરાત્મા દિવ્યગન્ધર્વજુષ્ટઃ ।
સ્વકલિતબહુશક્તિઃ દૂરદૃષ્ટસ્વકેતુઃ
    સકલનયનદૃષ્ટઃ કિં રમેશઃ સ્વતન્ત્રઃ ॥ ૧૮ ॥

સુરભિરિવ સુરાણાં સ્થાનભૂતાઙ્ગયષ્ટિઃ
    સકલમુનિગણેજ્યા હોમરક્ષાપ્રધાનઃ ।
સુકલિત બહુધર્મ્મૈરેવ દૃષ્ટસ્વરૂપઃ
    સ ચ યદુકુલનાથઃ સ્ત્રીસમાજાદ્વિશિષ્ટઃ ॥ ૧૯ ॥

રત્નાકરો જલધિવત્સુવિશાલમૂર્ત્તિઃ
    સ્ત્રીરત્નજન્મનિલયો નિલયો ગુણાનામ્ ।
મુક્તાપ્રવાળવિલસત્પરભાગજુષ્ટઃ
    લક્ષ્મીપતિત્વવિભવેન વિશેષિતોઽસૌ ॥ ૨૦ ॥

આનન્દાખ્યવિમાનતલ્લજરુચા નિત્યં સમુદ્ભાસિતે
    ક્ષેત્રે કૈરવિણીપદેઽતિવિલસદ્દિવ્યાલયેઽન્તર્ગૃહે ।
ઉદ્યદ્દક્ષિણવૃત્તબાહુવિલસચ્છઙ્ખારવામોદિતા
    શેષપ્રાણિચયસ્તદન્યભુજસન્નિર્દિષ્ટપાદામ્બુજઃ ॥ ૨૧ ॥

શ્રીમાન્વેઙ્કટકૃષ્ણનામયદુરાડ્-ભક્તાન્ નિજૈકાશ્રયાન્
        કુર્વન્ સોદરપુત્રમિત્રસહિતાન્ સુભ્રાતૃપુત્રૈસ્સહ ।
શ્રીતોણ્ડાદિમભૂભૃતે શુચિધિયે સન્દર્શયન્ સ્વાં તનું
        શ્રીવૈખાનસભક્તમુદ્ખમુનિવર્યાત્રિપ્રતિષ્ઠાપિતઃ ॥ ૨૨॥

દ્વાભ્યામેવ ન તેભ્ય એષ યદુરાડિષ્ટૈહિકામુષ્મિકા-
    ભિખ્યાર્થં પ્રદદત્સ્મિતાનનવિધુર્દોર્ભ્યામતીવોજ્જ્વલઃ ।
શ્રીમદ્રામસુસાત્યકિપ્રગુણવત્પ્રદ્યુમ્નપુત્રોત્તમ-
    સ્વારાતિપ્રચયાનિરુદ્ધદયિતૈર્વિદ્યોતતે સઙ્ગતઃ ॥ ૨૩ ॥

શ્રીમન્નૃસિંહવરદશ્રીરઙ્ગેશરઘૂત્તમૈઃ ।
મૂર્ત્તિભેદૈશ્શુભૈસ્સ્વસ્ય જયત્યર્જુનસારથિઃ ॥ ૨૪ ॥

સિદ્ધં જગદ્ધેતુતયા ભવન્તં રમાપતિં વેદશતૈસ્સુતર્કૈઃ ।
સર્વજ્ઞસામ્રાજ્યપદેઽભિષિક્તં જાનન્તિ સન્તો બહુશક્તિમન્તમ્ ॥ ૨૫ ॥

કારુણ્યાવિષ્ટચિત્તઃ કમલસમદૃશા વિશ્વલક્ષ્મ્યા સમાનઃ
    તત્તત્કર્માનુરૂપપ્રકૃતવિરહિતક્લેશવિશ્વપ્રચારઃ ।
તત્તત્તત્ત્વાન્તરાત્માપ્યકલિતતનુભૃત્કૃત્યતત્કાર્યસઙ્ગ-
    શ્ચામોક્ષં ક્લૃપ્તતન્ત્રઃ પરિણતિસમયેઽપેક્ષિતે મોક્ષદાયી ॥ ૨૬ ॥

શ્રીવૈકુણ્ઠાવસ્થિતો વાસુદેવઃ
    શ્રીભૂનીળાભિશ્ચ શેષાસનસ્થઃ ।
શેષશ્વાસહ્રાસવૃદ્ધ્યાનુગુણ્યાત્
    પાત્રં વિશ્વં ભઙ્ગસૃષ્ટ્યોઃ કરોષિ ॥ ૨૭ ॥

વક્ત્રપ્રભાપરિણતિસ્તવદિવ્યદેહઃ

દેહોચિતાનનરુચિર્નુ ચિરાય શઙ્ખા ।
સ્મેરં મુખં પ્રણતકર્ષકમન્યદઙ્ગં
યત્તચ્ચ તત્સમગુણં વદ પાર્થસૂત ॥ ૨૮ ॥

પાદામ્બુજાતકલિતૌ મણિનૂપુરૌ તે
મઞ્જુપ્રણાદમુખરૌ મકરધ્વજસ્ય ।
શિષ્યપ્રશિષ્યવિષયે નિયમેન સાઙ્ગ-
શ‍ૃઙ્ગારનર્મનિગમં પરિતો બ્રુવાતે ॥ ૨૯ ॥

મહામેરુર્દર્પાત્પદકમલભાવં હૃદિ લગન્
અહો નુ સ્વર્ણાઙ્ગઃ નિજહૃદયમપ્રાપ્ય બહુશઃ ।
પદામ્ભોજાપીઠાયિતકમલગાત્રો રવિરુચિઃ
સ્ફુરત્પદ્મે મૌળૌ વહતિ પદપદ્મં શ્રિતસુખમ્ ॥ ૩૦ ॥

પરાગપરમાણવો યદિ પતન્ત્યમી વેધસઃ
ઇતીવ કિલ ભીતધીસ્સુરપદાચલઃ પદ્મતઃ ।
સ્વરૂપમથ કલ્પયન્ તવ નુ વિશ્વમાતુઃ કૃપા
ધરાધર સુપાંસુળં પદયુગં વહન્મૂર્દ્ધનિ   ૩૧
ત્વત્પાદાબ્જે ધ્વજપવિમહાશઙ્ખચક્રદિરેખાઃ
દૃષ્ટાસ્સન્તીત્યનઘવચસો યે સ્તુવન્ પાદપદ્મમ્ ।
તદ્દ્રષ્ટારૌ કમલનયનસ્વર્ણપાથોજપીઠં
સાક્ષાદ્બ્રહ્મા દનુજવિજયે ક્લૃપ્તપાદાભિષેકઃ ॥ ૩૨ ॥

ત્વદ્દિવ્યલાવણ્યનિધિસ્વરૂપં કલ્યાણસંવાહિદૃશાં જનાનામ્ ।
સર્વાનુકૂલં જલધિર્નિરીક્ષ્ય નિન્દત્યહો ઘોષમિષાત્સ્વદેહમ્ ॥ ૩૩ ॥

તવ ચરણગતં યત્કર્કશત્વં મૃદુત્વં
યુગપદુદયભાવાત્સઙ્ગતં લબ્ધસખ્યમ્ ।
વનભુવિ શકટારૌ વાર્દ્ધિકન્યાકરાબ્જે
મુનિયુવતિદૃષત્વ ચેદને ચ પ્રદૃષ્ટે ॥ ૩૪ ॥

ત્વત્સઙ્કલ્પાદધિકશકનં તાવકાઙ્ગં ચ તત્ત-
ત્વત્તોઽપ્યુચ્ચૈરખિલવિદિતં નોચ્યતે પક્ષપાતાત્ ।
ઊરોર્જાતાસુરજનમનઃકર્ષણી ચોર્વશી સા
પદામ્ભોજસ્ફુરિતરજસઃ પાદદૃગ્ધર્મપત્ની ॥ ૩૫ ॥

પદસરસિજવૈભવં હિ શક્યં  ન ખલુ બુધૈર્નિગમૈસ્ત્વયાપિ વક્તુમ્ ।

સરસિજગૃહયા કરેણવા યત્તવ વદનેઽર્પિતરસ્યતાપ્રભાવમ્ ॥ ૩૬ ॥

શેષભોગશયનાન્મૃદુળં કિં ભાગ્યશાલિવટપત્રમનર્ઘમ્ ।
યત્ર ક્લૃપ્તશયનોઽર્ભકવૃત્ત્યા કલ્પસેઽસ્ય જગતોંઽકુરણાય ॥ ૩૭ ॥

નિર્મિતેષ્વથ જગત્સુ ચ સર્વેષૂચ્ચનીચપરિકર્બુરિતેષુ ।
અન્તરાત્મવિધયાખિલતત્ત્વેષ્વદ્ભુતાકૃતિરમૂનિ બિભર્ષિ ॥ ૩૮ ॥

એકરૂપમિવ યા પ્રકૃતિર્વા સા વિવર્ત્તમુપલભ્ય દૃશા તે ।
નામરૂપકલિતં ચ યથાર્હં ભૂજલેન્દ્રિયગતીશ્ચ બિભર્તિ ॥ ૩૯ ॥

વ્યૂહત્રયં વ્યૂહચતુષ્ટયં વા કિઞ્ચિન્નિમિત્તેન કરોષિ રૂપમ્ ।
રૂપાન્તરં વાર્જુનસૂત હૃદ્યં યદ્વિશ્વરૂપં કુરુપર્ષદાત્તમ્ ॥ ૪૦ ॥

વિશાલે લોકેઽસ્મિન્વિવિધફલજુષ્ટે નૃનિવહે
    યદીચ્છાવૈગુણ્યાત્પ્રભવતિ મિથો હિંસ્રવિધયા ।
તદા તત્રૈકસ્સન્ તદુચિતસુખાદ્યાશ્રિતમતિઃ
    સ્વતસ્નેહાધિક્યાદ્વ્રણગણવિરોપાય ભવસિ ॥ ૪૧ ॥

પ્રકલ્પ્ય જગદીક્ષણં તદનુ વિશ્વસંરક્ષણં યથા-
    વિધિ તતો લયસ્તદનુ જીવસઞ્જીવનમ્ ।
સ્વતો નિજધિયા ક્વચિત્ક્વચ પરાત્મસંવેશનં
    તતોઽન્યવિધયા ક્વચિદ્બહુ તનોષિ નર્મશ્રિયા ॥ ૪૨ ॥

સર્વજ્ઞાભાવાદ્દયયા વિસૃષ્ટે જીવાત્મવૃન્દેઽપ્યધિકારભાજિ ।
જ્ઞાત્વાઽઽર્તિહારિપ્રમુખપ્રવૃત્તિં ત્વાં સ્વં સ્વતન્ત્રં મનુતે હિ કશ્ચિત્ ॥ ૪૩ ॥

અનુદયાસ્તમયોઽમૃતસાગરાદમૃતદીધિતિરેષ મુખાભિધઃ ।
અનલસેશસુરેશમુખોદ્ભવપ્રભુરથો પરિલુપ્તતમઃ કથમ્ ॥ ૪૪ ॥

મુખમયપરિપૂર્ણચન્દ્રબિમ્બે ગ્રહણરુચી તવ કેતુસૈંહિકેયૌ ।
અસિતરુચિભરભ્રુવોર્મિષેણ પ્રથિતધિયઃ કિલ શઙ્કયેતિ મગ્નાઃ ॥ ૪૫ ॥

ઉભયવિભૂતિયોગસમયોચિતરત્નમહો
    ઽઙ્કુરલળિતેન્દ્રરત્નનિલયો નિલયો નૃદૃશામ્ ।
જલનિધિકન્યકાકરધૃતામ્બુરુહદ્વિતયે
    નવનવહાસકૃત્તવ કિરીટપતીરવિરુક્ ॥ ૪૬ ॥

કુણ્ડલં મુખમણ્ડનં શ્રુતિલમ્બિતં મણિકલ્પિતં

શ્રીમદંસસુસઙ્ગતં નિજભાવિધૂતતમોગણમ્ ।
નિત્યમુક્તસભાગતાર્થિગણાર્થપૂરણનિસ્તુલં
નેહ નાસ્તિ ચ નાસ્તિ ચેતિ સમત્વવાદિનૃઘોષિતમ્ ॥ ૪૭ ॥

સ્વાતન્ત્ર્યધૈર્યાર્જવવત્સલત્વપૂર્ણત્વશૂરત્વસમત્વમુખ્યાન્ ।
સંસૂચયત્યાત્મગુણાન્ બુધાનાં ત્વજ્જાનુલગ્નાયત વૃત્તબાહુઃ ॥ ૪૮ ॥

પ્રચ્છાયબાહુશાખાનાં પલ્લવોઽઙ્ગુળયઃ કિલ ।
અર્થિવાચ્યનુગાવૈરિકમલામર્મકર્ત્તનાઃ ॥ ૪૯ ॥

કમલોદરસોદરપાણિતલં વિનતાભયસત્રકથાકુતુકમ્ ।
સગરાત્મજપુણ્યનદીપ્રભવં કપટાકૃતિસૂતમહં કલયે ॥ ૫૦ ॥

વિષયાગ્નિશિખાપરિતપ્તનૃણાં
વિમલામૃતસાગરકર્મગુણમ્ ।
શિખિવાહન તત્પિતૃવન્દ્યપદં
કપટાકૃતિસૂતમહં કલયે ॥ ૫૧ ॥

દ્રોણસુતશસ્ત્રપરિતપ્તતનુરક્ષા-
કલ્પકધિયં સુજનકલ્પકમિહસ્થમ્ ।
દેવપતિનન્દનજપારિયુતજાતા
કર્ષકધિયં કલુષહારિગુણમીડે ॥ ૫૨ ॥

ક્રીડિતેન સુખપ્રદં પરિપીડિતાસુરનાયકં
પાલિતામરનાયકં પરિપિડિતાસુરરાક્ષસમ્ ।
વારિરાશિસુતાયુતં બલવૈરિરત્નગિરિત્વિષં
વામનોન્નતધીવિહીનમથાશ્રયે નરસારથિમ્ ॥ ૫૩ ॥

કરકલિતકશં ગજેન્દ્રવશ્યં
બલરિપુસોદરભાવદત્તચિત્તમ્ ।
મૃદિતરિપુગણં શિતૈશ્ચ શસ્ત્રૈઃ
અનુસવનં હૃદયે સ્મરામિ સૂતમ્ ॥ ૫૪ ॥

અનુગતચિદચિન્નિયન્તૃભાવં
સ્મૃતિગતસર્વજનાવનાખ્યસત્રમ્ ।
વિપિનસુમસૃજા વિભૂષિતાંસં
શ્રુતિશતનિર્જિતસદ્ગુણં ભજેઽહમ્ ॥ ૫૫ ॥

જલનિધિતનયાકૃતાત્મદેહ-
    શ્રમહરવન્દનમાલિકેતિ સદ્ભિઃ ।
અનુકલકૃતશઙ્કયા તમીડે
    કલિતરુચા વનમાલયા પ્રહૃષ્ટમ્ ॥ ૫૬ ॥

મુખકાન્તિવારિનિધિસઙ્ગતાવિમૌ
    શફરાવિતિ સ્તિમિતદૃક્સરોજયા ।
રમયા વિશાલકૃપયા સદેક્ષિતે
    નયને સ્મરામિ મમ તાપનુત્તયે ॥ ૫૭ ॥

કલિતોર્દ્ધ્વપુણ્ડ્રતિલકં મૃગીમદૈઃ
    સ્મયમાનચન્દ્રવદનં જિતશ્રમમ્ ।
કમલાક્ષિપાતસુભગં રસાવહં
    તપનીયવસ્ત્રધરમાશ્રયે સદા ॥ ૫૮ ॥

અળિકુલદળનાર્હકુન્તળાઢ્યં
    વિમલદૃશામળિકાક્ષરપ્રણાશમ્ ।
અળિકવચનદૂરસત્કટાક્ષાદૃત-
    વિબુધં પ્રણમામિ પાર્થસૂતમ્ ॥ ૫૯ ॥

મુખકાન્તિનામ્નિ જલધૌ સુખાવહે
    સ્મિતમૌક્તિકાધરસુવિદ્રુમં નવમ્ ।
વરનાસિકાવ્રતતિનાળભાસ્વર-
    દ્વિકપદ્મધીકરદૃશં શ્રયે હરેઃ ॥ ૬૦ ॥

ઉદરાણ્ડજાતગણનાર્પિતા અથો
    રદના અતીવ ધવળાશ્શુભાવહાઃ ।
રુચિરપ્રભાવિજિતકુડ્મલશ્રિયઃ
    સ્મૃતિસઙ્ગતા નરસખસ્ય મે શ્રિયૈ ॥ ૬૧ ॥

પદ્મામુખેન્દુકૃતસઙ્ગવળર્ક્ષભાવૌ
    તદ્ભાવસઙ્ગવિશદીકૃતસુન્દરાઙ્ગૌ ।
પાર્શ્વસ્થદ્રષ્ટૃજનદૃષ્ટનિજાત્મબિમ્બૌ
    વન્દે હરેસ્તુલિતશૈલતટૌ કપોલૌ ॥ ૬૨ ॥

ઉદારકૃતવીક્ષણં વિનતશોકનિર્વાપણં
    વિદર્ભતનયાઞ્ચિતં વિવિધતાપસંશોષણમ્ ।

વિશાલધવળપ્રભાશ્રયવશાચ્ચ નિઘ્નં નૃણાં
    પૃથાસુતરથાશ્રયપ્રભુનિરીક્ષણં પ્રાર્થયે ॥ ૬૩ ॥

યત્પાતલેશાત્કિલ કૌરવાણાં
    વૃન્દં કથાશેષિતમેવ દૃષ્ટમ્ ।
કિમત્ર ચિત્રં મમ જન્મહેતુ
    મર્મદ્રુતં નશ્યતિ તત્પ્રપાતાત્ ॥ ૬૪ ॥

અહો જનાનાં વ્યસનાભિમુખ્યં
    તદ્દૃષ્ટિપાતાદતિવર્તમાનાઃ ।
આબ્રહ્મસૃષ્ટેરનુવર્તમાન-
    સંસારકૂપે યદમી પતન્તિ ॥ ૬૫ ॥

યદા પાર્ત્થસૂત પ્રભાતારુણાબ્જ
    પ્રભાતુલ્યદૃગ્લેશધૂતાત્મતાપઃ ।
અભૂવં પ્રભાતપ્રભઃ કાળરાત્રિઃ
    કથં માં તુ કુર્યાદ્ભવાખ્યા ક્ષિતીન્દો ॥ ૬૬ ॥

હરિનયનસુધાપ્રવાહપૂતઃ
    સ્મિતમયચન્દ્રિકયાસ્ય ધૂતતાપઃ ।
તદનઘ મહિમાઽઽત્મદૃગ્જિતોઽહં
    હૃદિ કલયે કિમુ ભીતિમાત્મનાથ ॥ ૬૭ ॥

કરકલિતકશે સશઙ્ખચક્રે
    જલધિસુતા વિલસદ્ભુજાન્તરાળે ।
ત્વયિ વિલસતિ સર્વદે સુન્દરં તે
    નનુ રચિતાઞ્જલિરન્યતઃ કુતસ્સ્યામ્ ॥ ૬૮ ॥

જલનિધિતનયાદોર્વલ્લિપુષ્પૌઘશઙ્કા
    પ્રસૃમરરુચિરેખા કઙ્કણોલ્લાસિકણ્ઠઃ ।
મૃગમદકલુષોઽયં લોકકાલુષ્યહન્તા
    કલયતુ કુશલં નઃ કોઽપિ કારુણ્યરાશિઃ ॥ ૬૯ ॥

ઉદારભુજલોચનં સકલરક્ષણે લોલુપં
    શ્રિયા ચ નિજશોભયા ગલિતસુન્દરાઙ્ગં હરિમ્ ।
પ્રકૃષ્ટવનમાલયા જલધિસારરત્નશ્રિયા
    સુકર્બુરિતવિગ્રહં નરસખં હૃદા સંશ્રયે ॥ ૭૦ ॥

પારિજાતમિવ નન્દનશ્રિયં
નન્દગોપમિવ ગોવિશોભિતમ્ ।
દેવરાજમિવ વજ્રસઙ્ગતં
પાર્થસારથિમુપાશ્રયે હરિમ્ ॥ ૭૧ ॥

ચિદચિદવનદીક્ષં ચેતના પદ્મિનીનાં
સદયવિનતવીક્ષં વિસ્મિતાશેષદૃષ્ટમ્ ।
જલધિતુલિતદેહં જાનુલગ્નાત્મબાહું
નરરથનિલયં ત્વાં વીક્ષ્ય હૃષ્ટો ભવામિ ॥ ૭૨ ॥

કાશસુમકાશતનુમાત્મપતિમીશા-
વાસ્યમુખવેદશિખરેડિતગુણાબ્ધિમ્ ।
અબ્ધિતનયાનયનનિધ્નનિજવિશ્વા-
ધીશ્વરનિયન્ત્રણધિયં હરિમુપાસે ॥ ૭૩ ॥

સમ્ભાષમાણમિવ જઙ્ગમપારિજાતં
સ્મેરાયુધપ્રસવજાલવિભૂષિતાઙ્ગમ્ ।
નિત્યં શ્રિયા વસુધયા ચ નિષેવ્યમાણં
શ્રીપાર્થસારથિતનું મનવૈ મુકુન્દમ્ ॥ ૭૪ ॥

આચાર્યૈરેવ મુક્તો મયિ ચ કૃતદયૈઃ સાસ્ત્રદીપૈકદોર્ભિઃ
યોઽયં દેવોઽખિલેશઃ જલનિધિસુતયા સાર્દ્ધમાવિષ્કૃતાત્મા ।
તત્પાદામ્ભોજયુગ્મં કલય શરણમિત્યત્ર મા ગા વિષાદં
કુર્વાણસ્સત્યમેતત્ત્વહમુપકલિતા શેષકાર્યપ્રહૃષ્ટઃ ॥ ૭૫ ॥

અષ્ટવર્ણરથારૂઢં પ્રથમાક્ષરબોધિતમ્ ।
તૃતીયો વા ગતોઽસ્મ્યદ્ધા તચ્છેષત્વં સ્વતસ્થિતમ્ ॥ ૭૬ ॥

તાન્તોઽહં માનમુત્સૃજ્ય ધારકં પોષકં શ્રિયા ।
ભોગ્યં ત્વદાત્મસુગુરુદ્ધ્યાનપૂર્વં સ્મરામ્યહમ્ ॥ ૭૭ ॥

સર્વાવસ્થા સલક્ષ્મીકપાર્થસૂતદૃશેક્ષિતઃ ।
નિર્ભયસ્સર્વભાવેન શરણં યામિ તાદૃશમ્ ॥ ૭૮ ॥

તમસ્વર્ણસવર્ણપાર્થરથગં વીક્ષાભિવૃદ્ધાખિલં
લોકાધીશ્વરકાઙ્ક્ષિતાત્મવચનં વાચો વિદૂરાધ્વગમ્ ।

ગોપાલાવળિકીર્ત્યમાનવિપદુત્તારાદિવૃત્તામૃતં
    ભિષ્માદિસ્તુતિહૃષ્ટમાનસમમું સમ્ભાવયે માનસે ॥ ૭૯ ॥

કલિકલ્કભગ્નકવિમાનસામ્બુજ-
    સ્પૃહણીયકાન્તિભર એષ ભાસ્કરઃ ।
જયતિ પ્રસિદ્ધવિભવસ્ત્રયીગણે-
    ષ્વથ પુણ્ડરીકનયનસ્સતાં ગતિઃ ॥ ૮૦ ॥

પિતા ચ માતા ચ શરીરદાતા
    પોષ્ટા ગુરુર્જ્ઞાનસુધાપ્રદાતા ।
સ્ત્રીપ્રાયમજ્જીવનરોત્તમૈક-
    સંયોજિતા પાર્થરથપ્રણેતા ॥ ૮૧ ॥

શઙ્ખચક્રલળિતો ભુજદણ્ડઃ
    ભીતિહૃન્નતદૃશાં દ્યુસદાં વા ।
શત્રુવારિનિધિમન્થનજન્મા-
    રાતિ પદ્મનિલયા સુખસક્તઃ ॥ ૮૨ ॥

પાર્થવૃન્દપરિદર્શિતસારં
    સારભૂતવચનં નિગમાનામ્ ।
ભાગ્યસારમિવ સાધુજનાનાં
    આશ્રયે પ્રણયસૂચિતભાવમ્ ॥ ૮૩ ॥

સૌન્દર્યસારમિવ દર્પવિહીનમગ્ર્યં
    ચક્ષુષ્મતાં હૃદયકર્ષકમાત્તતોત્રમ્ ।
વૈરપ્રસક્તિરહિતાખિલભોગભોગ્યં
    આત્મેશ્વરં હૃદયતાપહરં સ્મરામિ ॥ ૮૪ ॥

ભૂભાગ્યલબ્ધસુખજઙ્ગમપારિજાતં
    સ્મેરપ્રસૂનસુભગં ફલભૂતરૂપમ્ ।
શાખોપશાખપરિજુષ્ટમિવાત્મદોર્ભિઃ
    પ્રચ્છાયતાપશમનં નરસૂતમીડે ॥ ૮૫ ॥

વાત્સલ્યવરાન્નિધિરદ્ભુતોઽસૌ
    દોર્ભિસ્તરઙ્ગૈરભિતઃ પ્રજુષ્ટઃ ।
લક્ષ્મીસમેતઃ કમનીયરૂપઃ
    કાન્તાળકઃ કમ્બુગળોઽસ્તુ ભૂત્યૈ ॥ ૮૬ ॥

વિશાલહૃદયોદયોલ્લસિતભાવલક્ષ્મ્યોજ્જ્વલઃ
    દ્વિષત્કુલવિમર્દનોચિતસભૂષદોર્મ્મણ્ડલઃ ।
વિનાપિ વિનતિં બુધે સુકલિતાત્મભાવઃ પ્રભુઃ
    મમાહિતવિમર્દને ભવતુ દીપ્તપઞ્ચાયુધઃ ॥ ૮૭ ॥

સિન્દૂરરૂષિતમિવોન્નતહસ્તિમલ્લં
    મલ્લેશદન્તપતનાર્હકરપ્રહારમ્ ।
હારાવળિપ્રકૃતદોર્યુગમદ્ધ્યશોભં
    રત્નત્વિષાવલિતમાત્મપતિં નમામિ ॥ ૮૮ ॥

મુખભવકલિતપ્રકર્ષવેદ-
    પ્રકટિતવૈભવયજ્ઞપૂજિતાત્મા ।
વિધિહયમખક્લૃપ્ત સદ્વપાળિ-
    પ્રકૃતકશાધરબન્ધુરોઽસ્તુ મહ્યમ્ ॥ ૮૯॥

દર્શય દર્શય ચારુમુખં તે પાટય પાટય પાપમપારમ્ ।
નન્દય નન્દય પાદનતં માં કેશવ કેશવ કારણસૂત ॥ ૯૦ ॥

સુન્દરકરિકરપીવરસક્થિઃ મન્દરગિરિરિવ જઙ્ગમયુક્તઃ ।
નાભિજપદ્મજકલ્પિતવિશ્વં પાલય પાલય કારણસૂત ॥ ૯૧ ॥

પાહિ પાહિ ભવપીડિતવિશ્વં કોમળાઙ્ગ કુસુમૈર્વનજાતૈઃ ।
વિશ્વરક્ષણસુદીર્ઘમખેસ્થં પદ્મયા વિલસિતાનનમીડે ॥ ૯૨ ॥

યદુનાથ મુદબ્ધીન્દો ત્વદઙ્ગમમૃતશ્ચ્યુતિ ।
મમાતિમુગ્ધહૃદયમિતશ્ચેતશ્ચ કર્ષતિ ॥ ૯૩ ॥

સ્વકાન્ત્યા નિર્દોષં નિરુદયવિબાધઞ્ચ સુસુખં
    પ્રકુર્વન્ વિશ્વં ત્વં વિમલલળિતામ્ભોજનયન ।
સુધાસારસ્તોમપ્રકલનમહામેઘલળિતઃ
    વિના ક્ષોણીસઙ્ગં વિનતહૃદયે વર્ષસિ સુધામ્ ॥ ૯૪ ॥

અહો મમેદં હૃદયં વિમુગ્ધં
    નાદેન જુષ્ટં જલધિં ચ પશ્યન્ ।
ઇતસ્તવ સ્તાવકબોદ્ધ્યમાનં
    સમઙ્ગળદ્ધ્વાનમવૈતિ નાથમ્ ॥ ૯૫ ॥

લાવણ્યવાપી તવ દેહકાન્તિઃ
    નર્મ્મોચિતા સાગરસમ્ભવાયાઃ ।
નાભિસ્થિતામ્ભોરુહયોગરમ્યા
    વેલાપ્યુદારા ભુજદણ્ડરૂપા ॥ ૯૬ ॥

ત્વદુદરનિલયં કિલાણ્ડજાતં
    વિબુધગણા અવલોકયન્તિ નૂનમ્ ।
યદિ તવ હિ તનુસ્સ્વયમ્પ્રકાશા
    પરિણતમેવ હિ સત્ત્વચિત્તભાગ્યૈઃ ॥ ૯૭ ॥

પદનખપરિમૃષ્ટચન્દ્રરેખા
    સુહૃદયગા વૃજિને તમોગુણેઽસ્મિન્ ।
કલિતબહુલયા તતોઽપુનર્જ્ઞે
    બહુવિલસત્યપુનર્ભવાય મહ્યમ્ ॥ ૯૮ ॥

ત્વત્પાદામ્બુજરેખયા પરિણતઃ છત્રારવિન્દદ્ધ્વજૈ-
    ર્યુક્તઃ કેતુરકૈતવાઽવનધિયં સંસૂચયત્યદ્ભુતઃ ।
યદ્વત્તે મનુજોઽસ્ય કૈતવધિયા  નમ્રે સ્વમૂર્ધ્નિ સ્વયં
    સપ્રાપ્તઃ પરમપ્રસાદમસુરપ્રદ્વેષિ વિષ્ણોઃ શુભમ્ ॥ ૯૯ ॥

સસ્નેહં નયનં પ્રવાળસુભગઃ યશ્ચાધરઃ શ્રીપતેઃ
    કણ્ઠશ્શ્રીકરકઙ્કણાઙ્કુલળિતઃ ભાવઃ પ્રસાદોજ્જ્વલઃ ।
વૃત્તાસ્તે ચ ભુજાઃ પુરન્દરતરોશ્શાખોજ્જ્વલાઃ પ્રાંશવઃ
    તન્મદ્ધ્યે સદયે ક્ષણા હરિસખી સર્વં જગન્મઙ્ગળમ્ ॥ ૧૦૦ ॥

શિખિપિઞ્ચવેલ્લિતસુગન્ધિકુન્તળં
    કમલાયતાક્ષમપમૃત્યુનાશકમ્ ।
અમૃતદ્રવશ્રુતિકટાક્ષવીક્ષણં
    હરિમાશ્રયે વિજયસારથિં પ્રભુમ્ ॥ ૧૦૧ ॥

સ્ફુરદિન્દ્રનીલસુભગત્વિષં હરિં
    યુવતીકટાક્ષવિશિખાવમર્દિતમ્ ।
પ્રભુતાશ્રયોચિતવિશાલલોચનં
    કમલાકટાક્ષહતતત્ત્વસમ્પ્લવમ્ ॥ ૧૦૨ ॥

પ્લવગર્ષભાનુગુણશીલસાગરં
    શ્રિતરાસમણ્ડલધિયં સ્મિતાનનમ્ ।

ભુજગેન્દ્રમૂર્ધ્નિ કૃતપાદમદ્ભુતં
    ભવસાગરપ્લવપદામ્બુજં શ્રયે ॥ ૧૦૩ ॥

ભજ હૃદયસુન્દરાઙ્ગં યદુપતિભાવં ગતં સ્વસૌશિલ્યાત્ ।
વ્રજયુવતિ નેત્રનિઘ્નં નિઘ્નં તદ્વસ્ત્રસંહતૌ શ્યામમ્ ॥ ૧૦૪ ॥

શિખિપિઞ્છસારકૃતનીલકુન્તળં
    કૃતયોગનિત્યપરિદૃષ્ટવિગ્રહમ્ ।
નિગમાવતંસરમણીયભૂષણં
    તરુણીવશં કમપિ બાલમાશ્રયે ॥ ૧૦૫ ॥

સ્ફુરદિન્દ્રનીલસુભગાઙ્ગમેદુરં
    દુરવગ્રહગ્રહવિશેષમોચકમ્ ।
મુરળીનિનાદજિતયોગિયૌવતં
    કલયે શિશું કમપિ પૂતનારિપુમ્ ॥ ૧૦૬ ॥

પૂતનાજિતડિમ્ભવિગ્રહવક્ત્રપીતતદાત્મકં
    ખઞ્જરીટજિતાત્મલોચનપદ્મયા સુભગાકૃતિમ્ ।
આકૃતિત્રયયુક્તવારિધિસમ્ભવા લુળિતાઙ્ઘ્રિકં
    વારિરશિનિભાઙ્ગકાન્તિમહં ભજેઽર્જુનસારથિમ્ ॥ ૧૦૭ ॥

પીતામ્બરં વરભુજાર્ગળયોગરમ્યં
    શ્વાસાનુયાયિનિગમં નિગમાન્તવેદ્યમ્ ।
વેદ્યાખિલાકૃતિકૃતિં ગજરાજલીલં
    લીલાર્થવિશ્વરચનં કલયે હૃદિસ્થમ્ ॥ ૧૦૮ ॥

અતિવિશાલભુજાન્તરશોભિતં
    વ્રજકૃશોદરિભાવહિતાશયમ્ ।
કમલસોદરપાણિતલં હરિં
    હૃદિ કરોમિ તમાલવનપ્રભમ્ ॥ ૧૦૯ ॥

કુટિલાળકપાળિવિશોભિમુખં
    શ્રમહારિદૃશાં સુદૃશાં ચ ફલમ્ ।
કલયેઽનુકલં કમલાનિલયં
    વિજયાજિરથસ્પૃહયાળુધિયમ્ ॥ ૧૧૦ ॥

સન્દૃષ્ટં પ્રઞ્મુખસ્થિત્યા પદ્મવદ્વિશ્વતોમુખમ્ ।

રુક્મિણ્યાદર્શદૃષ્ટાઙ્ગં આશ્રયે સૂતવિગ્રહમ્ ॥ ૧૧૧ ॥

રુક્મિણીસહિતં પાર્થસૂતં દૃષ્ટ્વા સ્વકૈર્વૃતમ્ ।
લક્ષિતઃ પ્રણવાર્થસ્ત્વાં ત્વદાત્મપરિદર્શિતઃ ॥ ૧૧૨ ॥

અથવા દર્શિતોઽપ્યર્થઃ નારાયણપદાનુગઃ ।
સર્વેષામાશ્રયો યસ્ત્વં ચેતનાનાં શુભાત્મનામ્ ॥ ૧૧૩ ॥

અન્યોઽપિ સંસ્મૃતો હ્યર્થઃ દર્શનાત્પાર્થસૂતતે ।
નમસશ્શબ્દ રત્નસ્ય યસ્ત્વં ગતિરથાત્મનામ્ ॥ ૧૧૪ ॥

પરસ્પરાદર્શનિજાઙ્ગહૃદ્યૌ
    હૃદ્યાળકોલ્લાસિ મુખેન્દુબિમ્બૌ ।
બિમ્બાત્મના દૃષ્ટજનૌ નિજાઙ્ગે
    ભૈમીવ્રજેશૌ સમુપાશ્રયેઽહમ્ ॥ ૧૧૫ ॥

સંશ્લેષોત્કર્ષસિદ્ધૌ નરહિતનિજરૂપાશ્રયાવેકતત્ત્વૌ
    કિંવેત્યાલોલધીભિર્વિમૃદિતલળિતોત્કૃષ્ટતત્ત્વાનુભાવૌ ।
ભાવાતીતાત્મભાવાવપિ જનહિતયા લોકવાસૈકમત્યા
    ક્લૃપ્તાર્ચ્ચાવિગ્રહૌ તૌ જનહિતકલનૌ રુક્મિણી પાર્થસૂતૌ ॥ ૧૧૬ ॥

સૌન્દર્યસ્યૈકરાશી વિદિતસમગુણૌ બિમ્બભૂતાવિવેમૌ
    નાથૌ ભૂતિદ્વયસ્યાપ્યખિલમખપરૌ દર્શિતાન્યોન્યસામ્યૌ ।
શ્રીમન્તૌ કીર્ત્તિમન્તૌ ક્વચન ચ વિધયાઽદૃષ્ટવૈગુણ્યભાવૌ
    ભાવૌ સર્વશ્રુતીનાં કથમિવ ઘટતે તદ્ગુણાલાપનાદૌ ॥ ૧૧૭ ॥

આદૌ તૌ સૃષ્ટિભવાવખિલસમયસંસક્તદેહૌ વિનૈકં
    દાતું વાસં ગ્રહીતું નયનયુગમિવાક્લૃપ્ત પાર્થક્યકાર્યૌ ।
શ્રીલક્ષ્મીનયકૌ ચ પ્રધિતકરુણયા વ્યાજતઃ કિઞ્ચિદેતૌ
    અસ્માકં ભાગ્યારાશી જનદૃશિ ચ પૃથગ્ભાવમાપ્તૌ શ્રયેઽહમ્ ॥ ૧૧૮ ॥

ઉન્નતાંસપરિલમ્બિકુણ્ડલૌ કુણ્ડલોપમિતસૂર્યમણ્ડલૌ ।
મણ્ડલાધિપતિવૃન્દવન્દિતૌ રુક્મિણીવિજયસારથી ભજે ॥ ૧૧૯ ॥

શૃઙ્ગારશાન્તિરસવારિનિધી ઉભૌ કિં
    કિં વા નૃશોકદહનાચિરદીપ્તમેઘૌ ।
કિં વાર્ધિકાઙ્ક્ષિતસદર્થિતદેવરત્ને
    ચિત્તે કરોમિ તરુણીમણિપાર્થસૂતૌ ॥ ૧૨૦ ॥

અબ્જનાભો હરિઃ સ્વર્ણકાન્તી રમા
    સઙ્ગતૌ પ્રાણિનાં પ્રાણદાનપ્રિયૌ ।
પદ્મનેત્રશ્રિયૌ ચારુમન્દસ્મિતૌ
સંશ્રયે રુક્મિણી પાર્થસૂતાવુભૌ ॥ ૧૨૧ ॥

નિજાઙ્ગલાવણ્યગતાત્મલોકૌ
પરસ્પરાઙ્ગપ્રતિબિમ્બિતાઙ્ગૌ ।
હંસાવિમૌ હૃદ્યગુણૌ સુરૂપૌ
વન્દે રમાપાર્થરથાશ્રયૌ તૌ ॥ ૧૨૨ ॥

નિજરુચિપરિમૃષ્ટહૃત્તમસ્કૌ
વિમલરુચિસ્મિતશોભિ ગણ્ડભાગૌ ।
કુસુમિત સુભગાવશુત્તમાલા-
વિવજલધિપ્રભવા નરૈકસૂતૌ ॥ ૧૨૩ ॥

અહો નુ સંપ્રાર્થયતે ગુણજ્ઞૌ
અયં હિ દાસઃ પ્રણયામ્બુરાશી ।
કિમસ્તિ વા ત્વત્તનુ દૃષ્ટિમૃષ્ટં
મત્પાતકં વાં પદપદ્મચૂડઃ ॥ ૧૨૪ ॥

સતાં નિયોગં શિરસા પ્રગૃહ્ય
નિજાત્મસાફલ્યગુણં ચ વીક્ષ્ય ।
તત્કાલહર્ષં હૃદિ ચિન્તયિત્વા
યથા સ્વધીશક્તિકૃતેહ માલા ॥ ૧૨૫ ॥

વામર્પિતાહં કૃતિમૂઢચિત્ત-
    કૃતાપિ યુષ્મદ્ગુણસંપ્રયોગાત્ ।
આમોદ ભારાવહલબ્ધવર્ણા
    જીયાચ્ચિરં વાં ચ મુદે કવીનામ્ ॥ ૧૨૬ ॥

લક્ષ્મિનૃસિંહાદિ શઠારિયોગિ
    સમર્પિતો વાં પદપઙ્કજાય ।
ત્વદ્દાસક્લૃપ્તેતિ ચ પશ્યતં તાં
    સત્સૂક્તિમાલા યુવયોર્મ્મુદેઽસ્તુ ॥ ૧૨૭ ॥

શ્રીમતે શ્રીવણ્શઠકોપ શ્રીલક્ષ્મીનરસિંહ-
    શઠકોપયતીન્દ્રમહાદેશિકાય નમઃ ।

શ્રીમતે શ્રીવણ્શઠકોપ શ્રીરઙ્ગશઠકોપ-
    યતીન્દ્રમહાદેશિકાય નમઃ ॥

અતિસરળપદપ્રસૂનગુમ્ભે
    હરિપદપદ્મમધુદ્રવે સ્પૃહા વા ।
રસિકબુધગણાગ્રગા ભુવિસ્થાઃ
    નરવરસૂતનુતિં પ્રપશ્યતૈનામ્ ॥ ૧૨૮॥

॥ શુભં ભવતુ ॥

End of Part 1

## દ્વિતીયો ભાગઃ ।

શ્રીગણેશાય નમઃ ।
            શ્રીઃ
નમશ્શ્રિયૈજગન્માતઃ તુભ્યં સર્વનમસ્કૃતે ।
સ્ત્રીરત્નેન ત્વયા વિષ્ણુર્દોર્મધ્યં નિત્યભાસ્વરમ્ ॥ ૧॥

ત્વયા વિના ન ચ હરિઃ ન ચ ત્વં હરિણા વિના ।
ન યુવાભ્યાં વિનાહં નો યુવામપિ મયા વિના ॥ ૨॥

જગત્પતિસ્સ ભગવાન્ માતસ્ત્વં હરિવલ્લભા ।
નિત્યદાસ્યોઽહમિતિ ચ પ્રણવપ્રતિપાદિતાઃ ॥ ૩॥

પ્રણવમયરથેઽગ્રતસ્સવિષ્ણુ-
    ર્હરિસખિમધ્યગતા સુમધ્યમા ત્વમ્ ।
અહમપિ યુવયોરધીનવૃત્તિઃ
    ચરમપદસ્થિત એષ રક્ષ્ય એવ ॥ ૪॥

કેચિદ્વદન્તિ રથિનં હરિમેવ મુખ્યં
    અન્યે તુ નિત્યકૃતદાસ્યમમુગ્ચ જીવમ્ ।
આદ્યન્તતસ્સ્થિતિમતોરનુકૂલધીર્ય-
    ત્તાં ત્વાં ચ સૂક્ષ્મમતયઃ પ્રવદન્તિ મુખ્યામ્ ॥ ૫॥

યશ્ક(?)ન્દો વૃષભસ્ત્રિપાદકલિતસ્તદ્વક્ત્રગોઽયં હરિઃ
    તન્મધ્યે ભવતી તતઃ કૃતપદઃ જીવશ્ચ દાસ્યોચિતઃ ।
જીવે ક્લૃપ્તદયાભરા ચ ભવતી ત્વદ્દૃક્પ્રસન્નો હરિઃ

યુષ્મદ્દાસ્યકૃતોદ્યમાન્નતજનાનૂરિકરોતિ પ્રભુઃ ॥ ૬॥

અતિચિરસહવાસયોગભૂમ્ના
પદવિનતં ન ચ હાતુમત્ર યુક્તમ્ ।
તવ તુ સુકરુણાર્દ્રદૃઙ્મહિમ્ના
હતવૃજિનં શરણોક્તિસાદરં મામ્ ॥ ૭॥

પ્રતાપપરિપાટિભિઃ વિમતદણ્ડનૈર્ભીકરં
સમીક્ષ્ય પતિમીદૃશં હરિસખિસ્સ્વપાદામ્બુજે ।
વિશેષવિનતં નરં મૃદિતકિલ્બિષં વીક્ષણાત્
પતિં નયસિ સાન્ત્વનોજ્ઝિતરુષં સતાં રક્ષકમ્ ॥ ૮॥

જગતામનુકૂલદૃગ્વિલાસૈ-
સ્તમસાં હન્તૃભિરાર્તતાપહૃદ્ભિઃ ।
જનનેત્રચકોરપારણાર્હૈઃ
સ શુભં યચ્ચ કરોષિ વિશ્વમેતત્ ॥ ૯॥

પરાઙ્મુખાનથપરમાર્થદૂરગાન્
સુધાસખિપ્રણતિવિદૂરગાનપિ ।
જનાન્ ધિયા જગદનુકૂલયા ચ સા-
પ્યુદકવાગમૃતરસેન સિઞ્ચસિ ॥ ૧૦॥

પરત્વેન પરામૃશ્ય પતિં ચ જગદીશ્વરમ્ ।
ભીતાનાં પ્રણતાનાં ચ વાક્યં શ્રુતિપુટેઽકરોઃ ॥ ૧૧॥

યથા સ સેવ્યતે વિષ્ણુઃ કલ્યાણગુણસાગરઃ ।
તથા ત્વમપિ કલ્યાણિ કલ્યાણાવહસદ્ગુણા ॥ ૧૨ ॥

યચ્ચક્ષુર્વિષયં ગતાથ ભવતી સન્તીર્ણદુઃખામ્બુધિઃ
મર્ત્યોઽયં યદિ દિવ્યદૃષ્ટિપદવીક્લૃપ્તાનુષઙ્ગસ્તવ ।
સોઽયં ધૂતપરાભવઃ પરિગતાશેષાર્થલાભઃ પ્રભુઃ
સૂચ્યૈશ્છત્રસુચામરાઞ્ચિતકરૈરામૈશ્ચ સંસેવ્યતે ॥ ૧૩ ॥

હરિદોર્મધ્યગા યા ત્વમતિદીનાન્ શ્રિતાન્નરાન્ ।
વીક્ષણાત્તુલ્યવિભવાન્ કરોષ્યમૃતસોદરિ ॥ ૧૪॥

યત્ર દૃષ્ટિર્નિધિસ્તત્ર ગજાશ્વરથસમ્ભૃતઃ ।
પુત્રપૌત્રાભિવૃદ્ધિશ્ચ તવ ચિત્તપ્રહર્ષકૃત્ ॥ ૧૫॥

સા ત્વં સુધાબ્ધિશિતાંશુપદ્મવિષ્ણુભુજાન્તરાત્
આનન્દનિલયે ભાસિ પાર્થસારથિના સહ ॥ ૧૬॥

શ્રીરસ્તુઃ ॥

End of Part 2

## તૃતીયો ભાગઃ

શ્રીગણેશાય નમઃ ।

શ્રીયૈ નમઃ ।

શ્રીમતે શ્રીમચ્છઠકોપશ્રીલક્ષ્મીનરસિંહશઠકોપયતીન્દ્રમહાદેશિકાય નમઃ ।

લક્ષ્મીનૃસિંહમખિલાવનબદ્ધદીક્ષં
તદ્ધર્મનિત્યનિરતાં દયિતાં ચ તસ્ય ।
તત્પાદપદ્મયુગસક્તનિજાત્મહંસાન્
તદ્ધર્મરક્ષણપરાન્ કલયે સદાહમ્ ॥ ૧॥

શ્રીરઙ્ગનાથપદમદ્ભુતદાનવૃત્ત-
ભાવાન્વિતં વિબુધસઙ્ઘસમાશ્રિતં ચ ।
સર્વત્ર દૃષ્ટબહુધર્મધિયં સ્વભક્તૈઃ
દૃષ્ટાત્મવૈભવમમું યતિવર્યમીડે ॥ ૨ ॥

શ્રીવિષ્ણુપાદપરિસઞ્ચરદક્ષશીલં
નિત્યં નરાર્પિતમહોપનિષત્સુસારમ્ ।
સારાત્મહૃદ્યવચનં વચનાતિદૂરં
કૃષ્ણં શ્રયે સુકલિતામૃતમેઘવૃત્તિમ્ ॥ ૩॥

લક્ષ્મીનૃસિંહશઠજિત્કરુણામ્બુરાશિં
નિમ્નોન્નતક્રમવિવર્જિતમદ્વિતીયમ્ ।
નિર્ધૂતતાપમવનીતલદેવતાના-
મુજ્જીવનપ્રદમમું રમણીયભાવમ્ ॥ ૪॥

પદ્માનુબન્ધસુખગન્ધવહં સદૈવ
સ્વાન્તર્ગતાખિલસુસદ્ગુણરમ્યમૂર્તિમ્ ।
સચ્છઙ્ખચક્રવિલસચ્છુભહેતુભૂતં
નિર્દ્ધૂતસન્નતભવં ભવિ ભાગ્યરાશિમ્ ॥ ૫॥

મત્સ્યાદિકૂર્મકિટિસુન્દરસિંહખર્વ-
    નિત્યાર્પિતાશયમવર્જિતરામભાવમ્ ।
કૃષ્ણં ત્વચિચ્ચકલને ક્વચિદચ્છભાવ-
    મશ્વાધિરોહપટુપોષણતત્પરાશમ્ ॥ ૬॥

નારાયણૈકનિલયં સ્વવશામરૌઘં
    સદ્ધર્મવર્દ્ધનપરં પરભાગજુષ્ટમ્ ।
ગમ્ભીરભાવસુભગં સ્મૃતિશુદ્ધિદાયિ
    સદ્ધર્મકૃદ્ધરણિદેવગણૈરમુક્તમ્ ॥ ૭॥

હંસાળિજુષ્ટમવિવર્જિતસેતુધર્મં
    તં કઞ્ચન ક્રમકરાવળિશોભમાનમ્ ।
નિર્દ્ધૂતકલ્મષગણં નિજસેવિનાઞ્ચ
    સત્વૈકસંશ્રયમનુન્ઘિતનૈજસારમ્ ॥ ૮॥

અકલિતપરભઙ્ગં સ્વાશ્રિતેઽદત્તભઙ્ગં
    વિનતજનસમાજેઽદૃષ્ટકાલુષ્યલેશમ્ ।
ગુરુમિહ સમભાવં ગ્રીષ્મકાલેઽપિવર્ષા-
    સ્વમલરસસમેતં યોગિનાથં નમામિ ॥ ૯॥

નિત્યં ચ હંસધ્વનિરાગયુક્તં
    સઙ્ગીતરત્નાકરવદ્ગભીરમ્ ।
વાદેષુ સમ્મોહનવત્સુયુક્તિં
    કલ્યાણ્યનુલ્લઙ્ઘિતગોવિલાસમ્ ॥ ૧૦॥

સદૈવ પુન્નાગવરાળિજુષ્ટં
    શ્રીરાગયુક્તં મહિતં રસજ્ઞૈઃ ।
યથોચિતે કાલ ઉપાસ્યમાનં
    ભક્તૈસ્સ્વપાદાર્પિતસર્વભાવૈઃ ॥ ૧૧॥

સ્વપદવિનતહંસં શોભિતાસ્યં સુવાણ્યા
    શુચિબહુમુખરમ્યં વેદવેદાર્થદક્ષમ્ ।
વિધિમિવ સુખસત્યં કાઙ્ક્ષિતં યોગિવૃન્દૈઃ
    અવિરળિતપદં તં મર્ત્યસિંહાદિપુંસઃ ॥ ૧૨॥

વિસ્તીર્ણશ્રુતિરોચિષા પરિગતં લોકાંશ્ચ કારુણ્યતઃ
    નિક્ષિપ્યાખિલચક્ષુષાં સુખકરે કણ્ઠે પવિત્રાઞ્ચિતે ।

તત્તત્કૃત્યવશાત્ફલપ્રદમતિં નીચોચ્ચભાવં વિના
  શ્રીલક્ષ્મીનરસિંહકારિજયતિં વિદ્યોદિતં ધાતૃવત્ ॥ ૧૩॥

વિનતસુજનવૃન્દપ્રીતિવિસ્ફારિતાક્ષં
  બહુગુણરમણીયં લોકરક્ષાવતીર્ણમ્ ।
દ્વિરસનકૃતપાદં ગુપ્તગોસમ્પદં વા
  કરકલિતમહાગોવર્ધનં નાથમીડે ॥ ૧૪॥

દત્તામ્બરં નતજનેષુ નિજેચ્છયૈવ
  ધર્માદરં પિહિતવન્ધ્યપરત્વભાવમ્ ।
સુભ્રૂલતાગ્રકલિતોત્કનરપ્રદૃષ્ટિં
  ગીતાર્યવદ્યતિમવૈમિ વિરાજમાનમ્ ॥ ૧૫॥

દૃષ્ટે મુખેઽસ્યલળિતે શ્રિતવિષ્ણુપાદે
  તાદૃગ્વિધૌ ક્વ ચ તિરોહિતવૃત્તભાવે ।
કાલે સુવૃત્તવતિ વા સુકળઙ્કયુક્તે
  કસ્સત્પતાવપિ મતિં ન જહાતિ ધીરઃ ॥ ૧૬॥

યા વૈ શિખા યતિવરસ્ય નિજાનુરૂપા
  કૌટિલ્યલેશરહિતા પ્રવિભાત્યનલ્પા ।
યદ્વા શિખી સ ચ તયા ક્વ ચ સાધુવૃન્દાઃ
  ધામ્ના શિખીતિ ગદિતું કિલ સંપ્રવૃત્તાઃ ॥ ૧૭॥

મૂર્ધ્નાપિ સદ્વૃત્તમયો યતીશઃ
  યદેનમાહુર્ભુવિ ભૂસુરાણામ્ ।
મૂર્ધાનમપ્યન્ત્યશરીરભાજાં
  મૂર્દ્ધન્યપાદામ્બુજ એષ યોગી ॥ ૧૮॥

અદ્વૈતગન્ધાનવધૂય શીઘ્રં
  સ્વાધીનવેદાન્તસુરદ્રુગન્ધઃ ।
ભોગ્યોયદસ્યાશુ જિતાત્મશત્રોઃ
  નાસાતિદીર્ઘા સફલા યતીન્દોઃ ॥ ૧૯॥

અનુદિતરવિયોગમન્ત્રજાપઃ
  યતિનૃપતિઃ કિલ મૂકભાવપન્ને ।
ઉષસિ નિયતધીર્યતો મહાન્સ્યાત્
  મુખકમલં ફલવદ્રસજ્ઞયાઢ્યમ્ ॥ ૨૦॥

યાવતીહ વસુધા સુવિશાલા
    તાવતી ખલુ નૃસિંહવિભૂતિઃ ।
તાવદસ્ય હૃદયં સુવિશાલં
    સર્વરક્ષણચણં સુવિભાતિ ॥ ૨૧॥

યદસ્ય વાક્યાદધરીકૃતાસ્તે
    પ્રચ્છન્નબૌદ્ધાઽસકૃદ્ધરણ્યામ્ ।
તતો ધરો નામ રદચ્છદોઽસ્ય
    તદ્યોગભૂમ્ના કિલ વાગ્જયોઽયમ્ ॥ ૨૨॥

અથવાસ્ય ધરાપિ નો સમા
    ભવતી વોચિતદાનકર્મણિ ।
વિનિવેદયિતું પરાજિતાન્
    અધરો ભાતિ મુખે યતીશિતુઃ ॥ ૨૩॥

ગર્ભેકુર્વન્ ગોમ્મુકામો નતૌઘં
    યસ્માદ્યોગી ભાતિ કારુણ્યચિત્તઃ ।
તસ્માત્પીનો ભાતિ વાસ્યોદરોઽયં
    અન્તસ્થાનાં ક્લૃપ્તપઙ્ક્તિસ્ત્રિવળ્યા ॥ ૨૪॥

પાર્શ્વે વસન્તો વસુધાધિપેન્દ્રાઃ
    સમાનચિત્તા વિષમાતિદૂરાઃ ।
તેષાં પ્રદૃષ્ટ્યાનુનિષેવિતત્વાત્
    પ્રમૃષ્ટપાર્શ્વો યતિનાથચન્દ્રઃ ॥ ૨૫॥

પીતામ્બરો હરિશ્શ્રીમાન્ હલી કૃષ્ણામ્બરઃ પુનઃ ।
રક્તામ્બરો નરહરિઃ તસ્માદ્રક્તામ્બરો યતિઃ ॥ ૨૬॥

પરિવૃત્તબાહુસુખલગ્નજાનુકઃ
    યતિનાથ એષ સતતં શુભાવહઃ ।
વિનિવાર્ય ભીતિમવનીતલૌકસાં
    શરણં શરણ્યગુણલક્ષિતો યતિઃ ॥ ૨૭॥

ભદ્રાસને જાગ્રતિ યોગિનાથે
    સમુન્નતે સ્વાત્મગુણૈશ્ચ શશ્વત્ ।
તતશ્ચ સંલબ્ધફલૌ તદૂરૂ

તત્રોચિતૌ પીવરતામુપાત્તૌ ॥ ૨૮॥

કશ્ચિત્ સ્વાર્થં યાતિ પન્થાનમાત્મા
લોકાર્થોઽસૌ ભાતિ વેદાદ્ધ્વની નઃ ।
છેત્તા યેષાં સંસૃતેર્વાગ્વિલાસૈઃ
તેષાં નૃણાં સૌખ્યસમ્પત્પ્રદાતા ॥ ૨૯॥

અષ્ટોત્તરે શતપદે કૃતસન્નિધાન-
લોકેશદિવ્યસુપવિત્રધૃતિક્ષમાં સઃ ।
યજ્ઞોપવીતવિલસદ્રમણીયવક્ષઃ
સુશ્રાવ્યનાદમહિતો બહુરક્તકણ્ઠઃ ॥ ૩૦॥

વૃત્તબાહુવિલસત્ત્રયદણ્ડઃ
પ્રાપ્તનમ્રબુધપાપનિબર્હઃ ।
સેઽવિતો ન યદિ યોગિવરિષ્ઠઃ
કા ગતિર્ભવજિગીષુજનાનામ્ ॥ ૩૧॥

બ્રહ્મસૂત્રહૃદયો યતિરાજઃ
વ્યાસપાદ ઇવ વિષ્ણુપદસ્થઃ ।
ભૂસુરેશકુલવૃદ્ધિકરોઽસૌ
સંશ્રિતેષ્ટબહુવૃદ્ધિકરસ્સ્યાત્ ॥ ૩૨॥

બાહુના સુકલિતત્રયદણ્ડઃ
યોગિનાં પરિવૃઢઃ કરુણાબ્ધિઃ ।
યૂયમેવમખિલાવનદક્ષં
હૃત્સુ માં કલયતેતિ ગિરન્નુ ॥ ૩૩॥

પાદઙ્ગુળીયનખનૂતનચન્દ્રલેખા
સેવાપરા યદિ નરા વિબુધા ભવેયુઃ ।
તેષાં મનાંસિ સુનિરસ્તતમાંસિ લોકે
નૈવ ક્વચિત્ પુનરમીષુ તમોવિકારાઃ ॥ ૩૪॥

ચરણાવિહ શઙ્ખચક્રરેખો-
લ્લસિતૌ શ્લક્ષ્ણતમૌ બુધૈર્ધૃતૌ યૌ ।
ભવસાગરમગ્નમર્ત્યપોતૌ
યતિભૂભૃન્મહિતસ્ય સંશ્રયેઽહમ્ ॥ ૩૫॥

સામુદ્રિકે વા યદિ વા બુભુત્સા
    યતેઃ પદાબ્જં તુ નિરીક્ષ્ય સમ્યક્ ।
યથાવિધાનં નનુ લક્ષણાનિ
    સ્વયા ધિયા કલ્પયત પ્રભુદ્ધાઃ ॥ ૩૬॥

સદ્ધર્મશાસ્ત્રે યદિ વાઽન્યશાસ્ત્રે
    નિત્યાહ્નિકે વા હરિયાગકૃત્યે ।
અદો યતીન્દોઃ પરિપશ્યતાત્ર
    કૃતં યદેતે ન હિ શાસનં વઃ ॥ ૩૭॥

અન્યત્ર વા યત્ર હિ સંશયસ્સ્યાત્
    ભક્ત્યા સમુદ્રીક્ષ્ય યતીન્દ્રધર્મમ્ ।
નિશ્ચિત્ય તન્નિર્ણયમેવ સત્યં
    જાનીત ધર્મં ચ તમેવ યૂયમ્ ॥ ૩૮॥

શ્રીરઙ્ગવાસરસિકં સુગુણામ્બુરાશિં
    પ્રાતઃ સ્ફુરત્સુરભિદર્શનહર્ષયુક્તમ્ ।
શ્લાઘ્યૈર્નવૈશ્ચ સુમનોભિરજસ્ય યુક્તં
    શ્રીશં ચ તત્સમગુણં યતિનાથમીડે ॥ ૩૯॥

ગતભયં શ્રુતિપાલનધીર્યતિઃ
    અખિલકાલમનન્તનતદ્વિજૈઃ ।
નિગમયોગ્યદિને સ્મૃતિગૌરવાત્
    નિખિલવેદવિચારમચારયત્ ॥ ૪૦॥

અમૃતદાનમતિર્નિજસેવિનાં
    સુમનસામજહન્નિજવિગ્રહઃ ।
યતિરિહાદ્ભુતલક્ષ્મણયોગિવા-
    ગમૃતદાનમહાદરધીરસૌ ॥ ૪૧॥

ભૂસુરૌઘમશેષેણ હિરણ્યાક્ષં વચોઽમૃતૈઃ ।
વિનિવર્ત્ય રસાસ્વાદે કૃતબુદ્ધીનકારયત્ ॥ ૪૨॥

હિરણ્યદો હરિશ્ચાસૌ યતિશ્ચેત્યેનયોર્દ્વયોઃ ।
આદ્યઃ ક્વચિદ્યતિશ્શશ્વદ્વિસ્મયઃ કસ્ય વા કૃતૌ ॥ ૪૩॥

હંસદ્વયં સ્મૃતિગતં સુપવિત્રમૂર્તિ-

    સ્મૃત્યા નૃણાં વિધિકૃતાખિલવેદજાતઃ ।
એકોઽન્ય એષ નરસિંહશઠારિયોગી
    સર્વત્ર દત્તનિગમો દ્વિજવર્યજાતે ॥ ૪૪॥

વિભુધરાઽવને વિલસન્મતિઃ
    કવિમકોપપદં કલયન્ યતિઃ ।
અજહદેવ નિજાખિલવૈભવં
    નિખિલવિક્રમશાલિપદામ્બુજઃ ॥ ૪૫॥

યેષાં ચ સ્મૃતિમારૂઢં યતેશ્ચરિતમઙ્ગળમ્ ।
તે નૃપાસ્સન્નતા યસ્ય તત્સામ્યેન નૃપા હિતઃ ॥ ૪૬॥

યત્કૃત્યદર્શનવશાદખિલાઘનાશઃ
    યદ્દર્શને સુમનસાં ન ચ તૃપ્તિરસ્તિ ।
ગુર્વાજ્ઞયા નિયમિતાવિહ યોગિરામૌ
    વિશ્વાવનક્ષમગુણૌ શરણં પ્રપદ્યે ॥ ૪૭॥

તીર્થે કૃતાદરૌ દ્વૌ તુ રોહિણીશાનયોગિનૌ ।
કૃષ્ણૈકસંશ્રયૌ નાથૌ તારતારપ્રકાશકૌ ॥ ૪૮॥

ક્વચિત્પુણ્યદેશે કૃતાત્માવતારૌ
    ક્વચિદ્દર્શિતાશેષરક્ષાસ્વભાવૌ ।
જિતાશેષશત્રૂ મુદા સર્વસેવ્યૌ
    વરૌ સત્યવાચૌ સુધર્મૈકચિત્તૌ ॥ ૪૯॥

વરાશેષલોકપ્રમાણસ્વવાક્યૌ
    નતોત્તારકૌ યોગિકૃષ્ણૌ ગુરૂ તૌ ।
રસોદ્ધારદક્ષૌ મહાયામુનેય-
    પ્રભાવાદરૌ દૂરધૂતામરેશૌ ॥ ૫૦॥

ગુણામ્ભોનિધી દિવ્યપદ્માક્ષમાલા-
    વૃતાંસૌ સુહંસાદૃતસ્વીયવાક્યૌ ।
સ્વવાક્યાવળીધૂતગાઙ્ગેયપૂર-
    દ્ધ્વનીધ્વાનમાધુર્યનમ્રાખિલેશૌ ॥ ૫૧॥

તેજસ્ત્રયોલ્લાસિતોઽસૌ કૃષ્ણો નૃહરિકારિજઃ ।
લક્ષ્મીમર્ત્યમૃગેન્દ્રશ્ચ ભજેઽહં તુલ્યવર્ચસઃ ॥ ૫૨॥

કર્ણશ્ચ દાનાદ્ભુવિ સુપ્રસિદ્ધઃ
    સૂર્યાત્મજોઽયં નકુલસ્ય વૈરી ।
સુરેશદત્તાનઘદિવ્યશક્તિઃ
    સ્મૃત્યા તુ હીનઃ સ્મૃતિમાન્ યતિસ્તુ ॥ ૫૩॥

અનાદિકાલાદઘકાષ્ઠદીપ્ત-
    જ્વાલાભવાત્તપિતસ્ય મેઽદ્ય ।
તત્તાપશાન્ત્યૈ નનુ દૃષ્ટમેવ
    દિવ્યૌષધં શ્રીનૃહરી શઠારિઃ ॥ ૫૪॥

અનાદિકાલોપચિતા હ્યવિદ્યા
    તયાભિતપ્તસ્ય મમાદ્ય લોકે ।
સઞ્જીવનં સર્વવિધોપયોગ્યં
    લક્ષ્મીનૃસિંહાદ્યશઠારિયોગી ॥ ૫૫॥

ન ચ સ્નાનં ન વા ભુક્તિઃ ભુક્તિમુક્તિફલપ્રદાત્ ।
લક્ષ્મીનૃહરિકાર્યાત્મજાતયોગિસ્મૃતેર્મતા ॥ ૫૬॥

ભવાભિધમહાહિના સુદૃઢદષ્ટનષ્ટાત્મનાં
    સુધાં સમુપજીવનીં ઝટિતિ યો દદાતિ સ્વયમ્ ।
રમાનૃહરિકારિજાત્યધિપતેરથાન્યો ભિષ-
    ગ્વરોઽસ્તિ યદિ વોચ્યતાં ક્વચન નાસ્તિ સત્યં હિ તત્ ॥ ૫૭॥

વિષયવિષાગ્નિના કૃતમુખેન દશેન્દ્રિયતઃ
    પ્રથુલભવાહિના સમુપદષ્ટનિજાત્મવતઃ ।
નરહરિરેષ એવ રમયા સુદ્રઢં કલિતઃ
    નરમૃગરાજકારિજમુખેન સુજીવયતિ ॥ ૫૮॥

કિયન્તૌ સ્વર્વૈદ્યૌ હરિકૃતસુજન્મા ચ સુમતિઃ
    સુધાકુમ્ભોદ્ધારોઽનુપધિદયધન્વન્તરિપદઃ ।
સ રામઃ કૃષ્ણો વા નૃહરિરથવા શ્રીનૃમૃગરાટ્-
    શઠારિર્વા યોગી ભવદહનતપ્તાય સુખદાઃ ॥ ૫૯॥

મૃતસઞ્જીવનં શાસ્ત્રે કૃષ્ણો રામ ઇતિ શ્રુતમ્ ।
લક્ષ્મીનૃસિંહશઠજિદ્યોગિસઞ્જીવનં પુરઃ ॥ ૬૦॥

કલિતબ્રહ્મચર્યેણ કૃતં સઞ્જીવનં ક્વચિત્ ।

કૃષ્ણેનાનેન યતિના બહુસઞ્જીવનં કૃતમ્ ॥ ૬૧॥

યત્પાદકલ્પતરુપલ્લવસક્તમૂર્ધ્નાં
    નૈવાસ્તિ તાપનિવહઃ પરિદૃષ્ટ એષઃ ।
તચ્છ્રીનૃસિંહપતિકારિજયોગિનાથાત્
    નાન્યસ્ત્રિવર્ગફલદસ્ત્રિગુણપ્રભેદી ॥ ૬૨॥

શિરસ્સુ યતિપાદાબ્જશઙ્ખચક્રાઙ્કિતેષુ વઃ ।
મુમુક્ષૂણાં સ્વદોર્મૂલશઙ્ખચક્રાઙ્કનૈરલમ્ ॥ ૬૩॥

અધિકદયૈકસારહૃદયે યતિભૂમિપતૌ
    નરહરિકારિસૂનુપદગે નયનાધ્વગતે ।
કિમિહ રસાયનૈઃ નવનવૌષધિસઙ્ઘટિતૈઃ
    પિબત સુચક્ષુષા ભવભૃદાર્તિહરં સુયતિમ્ ॥ ૬૪॥

ક્વચન દોષયુતેऽપિ નતવ્રજે
    નિકટમાશુ ગતે યતિશેખરઃ ।
અનઘદૃષ્ટિસુપૂતતદાત્મકઃ
    જયતિ વત્સલતાનિધિરદ્ભુતઃ ॥ ૬૫॥

હિરણ્યસ્ય ચૈકસ્ય હન્તા નૃસિંહઃ
    નિહન્તા ચ ષણ્ણામરીણાં યતીન્દ્રઃ ।
ઋષિશ્ચેત્પુરાણસ્ય કર્તા સ ચ સ્યાત્
    નસોऽસ્ત્યત્ર નૈવાસ્તિ વક્તા તદન્યઃ ॥ ૬૬॥

અન્યોપમર્દેऽપ્યધિકાત્મકાન્તિઃ
    આદર્શવત્સ્પષ્ટપરાત્મભાવઃ ।
સ્વચ્છસ્સ્વતો દર્શિતસૌમ્યભાવઃ
    નિજેન ધામ્ના પ્રચકાસ્તિ યોગી ॥ ૬૭॥

લક્ષ્મીનૃસિંહશઠજિત્કરુણાનિધિં તં
    ભૂસઙ્ગતં ચ સુદૃશામપિ ગૂઢભાવમ્ ।
શશ્વત્કૃતે પરિચયે ગહનં ગભીરં
    ભક્ત્યાઞ્જનેન સુદૃશઃ પરિપશ્યતૈનમ્ ॥ ૬૮॥

યાવત્કાલં સન્નતૌઘે  સમીપં
    સંપ્રાપ્તે વા સ્વાત્મભારાર્પણાય ।

નાયં યોગી યોગદૃષ્ટાખિલેશઃ
    ખિન્નો દૃષ્ટો દૃષ્ટપુંસિંહચિત્તઃ ॥ ૬૯॥

સર્વજ્ઞશ્ચ કલાધરશ્ચ સુયતી રામાર્પિતાત્માશયઃ
    કન્દર્પપ્રશમાય કલ્પિતમતિઃ પૂર્ણો હ્યહીનૈર્ગુણૈઃ ।
હાસેનાધરકલ્પિતાહિતગણસ્સમ્પૂજિતશ્ચામરૈઃ
    કણ્ઠે નિર્વિષવત્તયા સુમનસાં પૂજ્યો યતીન્દુશ્શિવાત્ ॥ ૭૦॥

જડોઽશક્તવાન્ તથા વૃજિનશન્તમીમોહિતઃ
    ત્રિવર્ગફલધીઃ પુનઃ ષડરિવર્ગભિન્નાશયઃ ।
સદા ભયભરાકુલઃ બહુળતાપસન્તાપિતઃ
    યતીન્દુકરુણામૃતાપ્લુતતનુશ્ચ નિર્ભીરહમ્ ॥ ૭૧॥

યદિ ચિરજીવિકાસુ વિબુધા ભવતાં સ્પૃહણં
    ન ખલુ તપઃક્રિયા ન ચ પયોનિધિસમ્મથનમ્ ।
અપિ તુ રમાનૃસિંહપતિકારિજયોગિગુણાં-
    બુધિમમૃતામયે કલયતાગ્ર્યધિયા નિજયા ॥ ૭૨॥

કરુણાપરિણામ એષ યોગી
    યતિનાથસ્ય ચ લક્ષ્મણાભિધસ્ય ।
ન હિ ચેદવનીતલસ્થિતાના-
    મવનેઽસ્ય ક્વ ભવેત્સ્વતોઽનુકમ્પા ॥ ૭૩॥

રઙ્ગનાથમિવ લોકભૂષણં
    વેદરાશિમિવ વિપ્રભૂષણમ્ ।
સત્પતિં વિધુમિવાનિશં ભજે
    શ્રીનૃસંહશઠજિદ્યતીશ્વરમ્ ॥ ૭૪॥

પદ્મરાશિમિવ તીર્થભૂષણં
    પદ્મયોનિમિવ હંસભૂષણમ્ ।
પદ્મજાતમિવ સત્યભૂષણં
    ભાવયે નૃહરિકારિજાભિધમ્ ॥ ૭૫॥

મૂલમન્ત્રમિવ સર્વથોઽર્થદઃ
    વ્યાપકેષુ મહિતશ્ચ સર્વતઃ ।
જન્મશુદ્ધિકરશક્તિભૂષિતઃ
    ભક્તિભાવરહિતૈરલક્ષિતઃ ॥ ૭૬॥

મન્ત્રરત્નવદશેષભોગ્યધીઃ
    દર્શિતાખિલસુતત્ત્વનિર્ણયઃ ।
સાદ્ધ્યસાધનતયા ચ સેવિતઃ
    સંયમી નરહરીશકારિજઃ ॥ ૭૭॥

અન્ત્યશ્લોકો યથાऽમોઘો નરચિત્તપ્રદાર્ઢ્યદઃ ।
તથાયં સેવિતો યોગી ચિત્તોત્સાહપ્રદઃ શુભઃ ॥ ૭૮॥

ભીષ્મભૂપ ઇવ રઙ્ગક્લૃપ્તધીઃ
    દર્શિતાખિલસુતત્ત્વનિર્ણયઃ ।
ધર્મજાતબહુવિસ્તરાશયઃ
    સર્વપાર્થિવગણૈશ્ચ પૂજિતઃ ॥ ૭૯॥

સુધાબ્ધિવત્સક્તગજાશ્વઘોષઃ
    રમાપતિસ્થાનવરસ્વરૂપઃ ।
કલાધરોત્પાદકરો ગરિષ્ઠઃ
    નૃસિંહકાર્યાત્મજયોગિનાથઃ ॥ ૮૦॥

સાવધાન ઇવ દર્શિતસ્મૃતિઃ
    સ્વર્ગવદ્રુચિરભાવબન્ધુરઃ ।
કલ્પવત્સફલરૂપમેદુરઃ
    શ્રીનૃસિંહશઠજિદ્યતીશ્વરઃ ॥ ૮૧॥

સર્વકાલકલિતા ગુણા યતેઃ
    શ્રીરમાનૃહરિરાટ્-શઠદ્વિષઃ ।
નૈવ યાન્તિ હિ સમાપ્તિમદ્ભુતાઃ
    કાલ એવ વિલયં ગતો ભવેત્ ॥ ૮૨॥

યે યે ગુણા નિગમશેખરદેશિકોક્તા
    શ્રીલક્ષ્મણાખ્યયતિરાજસુધામનિષ્ઠાઃ ।
યે કૂરનાથનિયતા મહિતાશ્ચ સર્વે
    તે શ્રીનૃસિંહપતિકારિજયોગિનિષ્ઠાઃ ॥ ૮૩॥

વાચામગોચરતયા પ્રથિતા ગુણાસ્તે
    કીર્ત્યુલ્લસત્ત્રિભુવનસ્ય દયામ્બુરાશેઃ ।
શ્રીમન્નૃસિંહપતિકારિજયોગિનેતુઃ

તદ્ભક્તિકલ્પિતધિયા કલિતા હિ કેચિત્ ॥ ૮૪॥

જ્ઞાનતોઽજ્ઞાનતો વાપિ કૃતે કર્મ્મણિ યઃ ફલી ।
ફલી શ્રીનૃહરિર્ભૂયાત્ નિજમૂર્ત્યન્તરસ્તુતેઃ ॥ શ્રીઃ ॥ ૮૫॥

શ્રીમતે શ્રીમચ્છઠકોપશ્રીલક્ષ્મીનરસિંહ-
શઠકોપયતીન્દ્રમહાદેશિકાય નમઃ ।
શુભં ભવતુ ॥

End of Part 3

## ચતુર્થો ભાગઃ ।

શ્રીગણેશાય નમઃ ।
શ્રીઃ ।
શ્રીમતે શ્રીમચ્છઠકોપશ્રીલક્ષ્મીનરસિંહશઠકોપ-
યતીન્દ્રમહદેશિકાય નમઃ ।
વન્દે શ્રીરઙ્ગગશઠજિદ્યોગિનાથસુધાકરમ્ ।
યદ્વાણીચન્દ્રિકાતૃપ્તાસ્સદા બુધચકોરકાઃ ॥ ૧॥

આજાનશુદ્ધવિભવં દત્તભૂદેવભૂષણમ્ ।
લક્ષ્મીનૃસિંહનિલયં સુધાબ્ધિમપરં શ્રયે ॥ ૨॥

સ્વવૃત્તામોદિસુજનં અનીચોચ્ચસમાદરમ્ ।
ગુરુલબ્ધબલૈશ્વર્યમપરં રામમાશ્રયે ॥ ૩॥

સદાગમોલ્લાસધિયં વાઙ્માધુર્યાન્મધુદ્વિષમ્ ।
રસાર્ણવૈકનિલયમાદિમત્સ્યમિવાપરમ્ ॥ ૪॥

અમૃતોત્પાદનોપાયં વિબુધાનાં દૃઢાશયમ્ ।
હર્યંશાદુદ્ધૃતસ્વાઙ્ગમાદિકૂર્મ્મમિવાપરમ્ ॥ ૫॥

રસાશ્રયોજ્જ્વલતનું હિરણ્યાક્ષનિષૂદનમ્ ।
શ્રીમુષ્ણસઙ્ગોલ્લસિતં ભૂવરાહમિવાપરમ્ ॥ ૬॥

પ્રહ્લાદદર્શિતાત્માનં સન્ધ્યાકાલપ્રતીક્ષકમ્ ।
લોકાવનક્ષમગુણં શ્રીનૃસિંહમિવાપરમ્ ॥ ૭॥

સર્વોન્નતસ્વભાવાઢ્યં સદાગમસમુજ્જ્વલમ્ ।

સર્વજ્ઞેપ્સિતવત્તોયં ત્રિવિક્રમમિવાપરમ્ ॥ ૮॥

નિરાકૃતાવનીપાલં શ્રીરામાર્પિતહૃદ્ધૃતિમ્ ।
શ્રીરઙ્ગશઠજિન્નાથમાદિં રામમિવાશ્રયે ॥ ૯॥

સર્વલોકેપ્સિતગુણં સર્વાહ્લાદૈકમૂર્ત્તિકમ્ ।
લસન્મુનિગણામોદિકૃત્યં રામમિવાપરમ્ ॥ ૧૦॥

કૃષ્ણપ્રભાવિલસિતં સ્ફારતારપ્રકાશકમ્ ।
શુભતીર્થકૃતાહ્લાદં બલરામમિવાપરમ્ ॥ ૧૧॥

કૃષ્ણાં ચ યેન રાજન્તં ધર્મસ્થાપનતત્પરમ્ ।
વિજયૈકકરં લોકપૂજ્યં કૃષ્ણમિવાપરમ્ ॥ ૧૨॥

કલિં નિપાત્ય ધર્માણાં સ્થાપનાર્હકૃતોદ્યમમ્ ।
શ્રીરઙ્ગશઠજિદ્યોગિવિધું કલ્કિમિવાશ્રયે ॥ ૧૩॥

અનધીત્ય શ્રુતિં સમ્યગલબ્ધ્વા શાસ્ત્રસમ્પદમ્ ।
શ્રુતિશાસ્ત્રોલ્લસદ્રઙ્ગશઠજિદ્વૃત્તવાક્ તુ કઃ ॥ ૧૪॥

સ્મૃતિપાવનસત્કીર્ત્તેશ્શ્રીરઙ્ગશઠવૈરિણઃ ।
યોગીન્દ્રસ્ય શુભં વૃત્તં મદ્વાચા નિસ્સરત્યહો ॥ ૧૫ ॥

સ્વભાસા ભૂષયન્ લોકં વિનિર્ભિદ્ય તમોગણમ્ ।
સર્વદા પૂર્ણમૂર્ત્તિર્હિ ચન્દ્રમા અપરો હ્યયમ્ ॥ ૧૬ ॥

સર્વત્રોચ્ચૈસ્સ્થિતિશ્શ્રીકૃત્ બુધાશ્લેષસમુન્નતિઃ ।
મકરેઽવતરન્નુચ્ચૈઃ વિશ્વદેવર્ક્ષગો ગુરુઃ ॥ ૧૭॥

જાયમાનં હરિઃ પશ્યન્ સાત્ત્વિકાનાં સમૃદ્ધયે ।
યથામુમાત્મનાઽઽત્માનં પ્રેમ્ણા હૃષ્ટમના અભૂત્ ॥ ૧૮॥

અહં રેખામયીવિદ્યા યાવત્યસ્યોચિતેતિ સા ।
સ્વાં ચ તં ગ્રાહયામાસ લોકાવિદ્યાનિવૃત્તયે ॥ ૧૯॥

ભવિતા બ્રહ્મસૂત્રીતિ રોદ્ધા નિર્ગુણવાદિનામ્ ।
સાવિત્ર્યુદૈક્ષતામું ચ સગુણબ્રહ્મસૂત્રિણમ્ ॥ ૨૦॥

ભવિષ્યતિ ત્રિદણ્ડીતિ ત્રયીમાત્રાનુગામિની ।
વિવેશ મધુરાત્માનં મધુનાથસમાનનમ્ ॥ ૨૧॥

પદક્રમાનુગશ્ચાર્થ ઇત્યેવ શુભધીરસૌ ।
પૂર્વં પદક્રમં પશ્ચાદર્થવિસ્તારમગ્રહીત્ ॥ ૨૨॥

તર્કે પ્રાધાન્યબુદ્ધ્યૈવ તર્કશાસ્ત્રં સવિસ્તરમ્ ।
પ્રણેતૃપ્રતિભાયોગ્યં દૃઢં ચેતસિ સન્દધે ॥ ૨૩॥

અત્ર ચિત્રમિદન્ત્વેવ પ્રતિવક્તું ક્ષમેતરાઃ ।
સ્વધીવિલાસભૂમ્નામું હૃદ્યકુર્વન્નતાનનાઃ ॥ ૨૪॥

ધર્મશાસ્ત્રક્રિયાસ્સર્વાઃ ગુરુણા બહુમાનિતાઃ ।
પશ્ચાદ્રક્ષિષ્યમાણાસ્સ્યુરિત્યસઙ્કોચવિસ્તરમ્ ॥ ૨૫॥

આવીક્ષકી સાહિતી ચ તે હ્યસ્મિન્ સત્પથાનુગે ।
સમૂષતુઃ કવિતયા સર્વરઞ્જનયા મુદા ॥ ૨૬॥

પૂર્વસૂરિપ્રબન્ધાશ્ચ સાવકાશં સમાદૃતાઃ ।
સમેત્યાસ્મિન્ ગુરૌ વિદ્યા ઊષુરાભરણાનિ વા (ઇવ)॥ ૨૭॥

સુખિતાસ્તાસ્સમીક્ષ્યાપિ ગુરૌ જ્ઞાનેશબોધિતા ।
સ્પર્દ્ધયેવાવિશત્ સૌત્રીસાગ્રાતાભ્યોઽતિશાયિની ॥ ૨૮॥

તત્તદ્વિદ્યાસુ યાવત્તા સર્વાપ્યસ્મિન્ ગુરૌ સ્થિરા ।
સ્વસ્વાલઙ્કાર ઇત્યેવ નિત્યાવાસમમન્યત ॥ ૨૯॥

આભિર્જુષ્ટં ગુરું વીક્ષ્ય ક્ષમાશાન્ત્યાદયો ગુણાઃ ।
માનસેઽસ્ય કૃતસ્થાનાઃ વજ્રલેપાઞ્ચિતા ઇવ ॥ ૩૦॥

વિદ્યગુણૈરાત્મગુણૈર્નિબદ્ધં બન્ધદૂરગમ્ ।
નૃહરિસ્સત્યસઙ્કલ્પઃ સ્વચેતસ્યકરોદ્ગુરુમ્ ॥ ૩૧॥

ગુરોરાશાલવાલે સ્યુઃ તત્તદ્વિદ્યાલતાશ્શુભાઃ ।
વાક્પુષ્પૈરર્ચિતદિશઃ શાલિન્યશ્ચ યશઃ ફલૈઃ ॥ ૩૨॥

શ્રુત્વાઽસ્યવાણીં વિબુધાઃ સુધાયાં હરિગૌરવાત્ ।
સ્પૃહાં ચક્રુઃ સ્વબુદ્ધ્યા ન યદ્વાઙ્નિત્યામૃતપ્રદા ॥ ૩૩॥

વિદ્યાચન્દ્રિકયા જુષ્ટે રાજમાને દ્વિજેશ્વરે ।
સચ્ચકોરાઃ કૃતાસ્વાદાઃ અન્યે કાકપદાનુગાઃ ॥ ૩૪॥

પરિશુદ્ધૈર્હવિર્ભિસ્સમનસા ચ યથોચિતૈઃ ।
અથ નિત્યોક્તવિધિના તોષયામાસ માધવમ્ ॥ ૩૫॥

પાઞ્ચકાલિકધર્મજ્ઞઃ યજન્ તેનૈવ વર્ત્મના ।
સ્વાર્ચામારાધ્ય સંહૃષ્ટઃ દક્ષો દક્ષાદ્ભભૌ સુધીઃ ॥ ૩૬॥

યે સાત્ત્વિકા મહાત્માનઃ શ્રુતિસઙ્ગપ્રહર્ષદાઃ ।
ઉપમાનમભૂત્તેષાં તત્તત્કૃત્યસધર્મકૃત્ ॥ ૩૭॥

નતાત્મનાં ગુરુર્બન્ધુઃ લોકે નારાયણો યથા ।
યસ્ય શક્તિસ્થિરોદર્કા સર્વજ્ઞસ્ય મહત્યભૂત્ ॥ ૩૮॥

પરાશરો વા મુનિરાડ્રત્નં યેન વિનિર્મિતમ્ ।
મુમુક્ષ્વાભરણં પૂર્વાપરાધિષુ ચ ધર્ષણમ્ ॥ ૩૯॥

વ્યાસશ્શ્રુતિપરામર્શી શ્રુતિસારૈકસૂત્રધીઃ ।
અભિજ્ઞો લોકવૃત્તાનાં સદ્ભિરેષઃ પ્રકીર્ત્તિતઃ ॥ ૪૦॥

શુકોઽયં કૃષ્ણપક્ષશ્ચ વર્ધમાનઃ પદેપદે ।
નિર્દોષકલયા પૂર્ણો ગુરુર્લોકૈકવન્દિતઃ ॥ ૪૧॥

દયયા યતિ ભૂપાલઃ પારમૈકાન્ત્યસમ્પદા ।
કૂરનાથો ભટ્ટવરઃ તત્ત્વાનાં નિર્ણયોક્તિભિઃ ॥ ૪૨॥

તત્ત્વવિસ્તારભૂમ્ના ચોપકારકરસૂક્તિભિઃ ।
ત્રય્યન્તદેશિકસ્સર્વતન્ત્રે સ્વાતન્ત્ર્યતાયુતઃ ॥ ૪૩॥

નૃસિંહપ્રીતિકરણે પ્રહ્લાદોઽભૂદ્ગુરુસ્સ્વયમ્ ।
સદ્વૃત્તૈઃ પ્રીણયન્ સમ્યગ્જ્યોત્સ્નયૈવ જનં શશી ॥ ૪૪॥

દિવ્યક્ષેત્રેષુ સર્વત્ર વર્ષન્તં વચનામૃતમ્ ।
સર્વતૃટ્-શમનં સન્તો મેનિરે લક્ષ્મણં યતિમ્ ॥ ૪૫॥

પ્રબન્ધાર્થપ્રવક્તારં ભીકરં તદ્વિરોધિનામ્ ।
કલિઘ્નમથવા કારિસૂનું સર્વે શશઙ્કિરે ॥ ૪૬॥

શભકૃદ્વૃત્તસમ્પન્નઃ પારમૈકાન્ત્યભસ્વરઃ ।
હૃદયઙ્ગમકીર્ત્યાઢ્યઃ ગુરુર્લોકૈકવન્દિતઃ ॥ ૪૭॥

તત્તાદૃગ્ગુણસમ્પન્નં સચ્ચારિત્ર્યૈકવત્સલઃ ।
લક્ષ્મીનૃકેસરી સ્વાર્થે યતીન્દ્રુમકરોદ્ગુરુમ્ ॥ ૪૮॥

લક્ષ્મીનૃકેસરી સાત્ક્ષાત્ શઠારિશ્ચેત્યુભૌ ગુરૂ ।

એકીભૂયોદિતૌ યેનાભિષિક્તસ્તેન તત્પદે ॥ ૪૯॥

બ્રાહ્મ્યા શ્રિયા લૌકિકયા શ્રીનૃસિંહસ્ય તેજસા ।
ભાસ્વન્તં ભાસ્કરાભં તં નતહૃત્પદ્મરાશિષુ ॥ ૫૦॥

શ્રીનૃસિંહશઠારાતિયતીન્દ્રસ્સ્વીયતેજસા ।
કૃતનીરાજનં પ્રેમ્ણાકરોત્સર્વત્ર ભાસ્વરમ્ ॥ ૫૧॥

લક્ષ્મીનૃસિંહશઠજિન્મનઃકુમુદચન્દ્રમાઃ ।
શ્રીરઙ્ગશઠજિદ્યોગી જયત્યદ્ભુતચેષ્ટિતઃ ॥ ૫૨॥

યતીન્દ્રોર્મેળને શ્લાઘ્યા શોભાહર્ષકરી સતામ્ ।
અવિચ્છિન્નામૃતાસ્વાદા રામલક્ષ્મણયોરિવ ॥ ૫૩॥

કૃતાન્વયશ્શ્રીનૃહરૌ યોગી ભાતિ હ્યનન્વયઃ ।
લક્ષ્મીનૃસિંહશઠજિદ્યોગીન્દ્રકરુણાપ્લુતઃ ॥ ૫૪॥

યેન લક્ષ્મીનૃસિંહશઠકોપયતીન્દ્રેણ રૂપેણ એકીભૂય ઉદિતૌ
તેન યોગીન્દ્રેણ તત્પદે અભિષિક્તઃ ॥ યતીન્દ્રેણ સ્વપદેઽભિષિક્તઃ ॥

પશુવ્યાઘ્રૈક્યસમ્પત્તિઃ ગજસિંહસમાશયઃ ।
નિર્વૈરમભવત્તત્ર પ્રશાન્તાશ્રમસન્નિધૌ ॥ ૫૫॥

સદા તત્ત્વવિચારશ્ચ સદાઽમૃતવિગાહનમ્ ।
શ્રવણૈર્વિદુષાં શ્રીમદ્ધંસદ્વિતયસન્નિધૌ ॥ ૫૬॥

સર્વસંશયવિચ્છિત્તિરહિતાર્થનિરાસનમ્ ।
સર્વવિદ્યાપ્રચારશ્ચ વરહંસયુગાન્તિકે ॥ ૫૭॥

વૃષ્ટિર્વસોશ્ચ વિદ્યાયાઃ પુષ્પસ્ય મધુનો યથા ।
સર્વામોદકરી લક્ષ્મીનૃસિંહહૃદયઙ્ગમા ॥ ૫૮॥

સર્વથા સંપ્રવૃત્તા સા દેવાનામપિ દુર્લભા ।
દશધા લસદાત્માપિ તુષ્યત્યાત્મેશ્વરો હરિઃ ॥ ૫૯॥

ગુરુસન્તોષકૃદ્વૃત્તઃ હંસશ્શિષ્યો યતિસ્સદા ।
શિષ્યહંસાભિમાની ચ યતિરાડ્-ધર્મતત્ત્વવિત્ ॥ ૬૦॥

સાત્વિકી પરમા દૃષ્ટિસ્તયોઃ પરમહંસયોઃ ।
વિભાતિ દેહમાત્રેણ ભેદો નૈવાશયે ક્વચિત્ ॥ ૬૧॥

પરસ્પરગુણાદર્શૌ પરસ્પરગુણાદરૌ ।
પરસ્પરપ્રીતિનિધીવિદુષાં વિસ્મયાવહૌ ॥ ૬૨॥

બ્રહ્મવિદ્યોજ્જ્વલત્સ્વાઙ્ગં વિશ્વામોદકૃતોદયમ્ ।
પદ્મોલ્લાસકરં ભાન્તં વિષ્ણ્વેકનિલયં યતિમ્ ॥ ૬૩॥

સર્વસન્તાપહરણચ્છાયોલ્લાસિતવિગ્રહમ્ ।
આશ્રિતાભીષ્ટફલદં સૌમ્યં સૂર્યં વિલક્ષણમ્ ॥ ૬૪॥

દ્વારં ભવતિતીર્ષૂણાં સદ્ભાવં દ્વિજજન્મનામ્ ।
અભાવં દોષવર્ગાણાં શ્રીરઙ્ગશઠજિદ્યતિમ્ ॥ ૬૫॥

સન્માર્ગબુદ્ધિસદ્ધેતું વરતેજોનિધિં શુભમ્ ।
સર્વારોગ્યપ્રદધિયં શુચિકારણમાશ્રયે ॥ ૬૬॥

નૃસિંહાનુષ્ટુભા પ્રીતો રઙ્ગિકારિજદત્તયા ।
લક્ષ્મીનૃસિંહો યન્નિધ્નઃ શ્રયે રઙ્ગશઠદ્વિષમ્ ॥ ૬૭॥

દેહવાગ્વૃત્તહૃદયગામ્ભીર્યાત્ કવિમોહનમ્ ।
ઇત્થં ત્વેન ગિરાવક્તું યતીન્દ્રં મુહ્યતીવ ધીઃ ॥ ૬૮॥

નિત્યારિયાતુહન્તારં ભવસિન્ધુવિશોષણમ્ ।
મમતાવિન્ધ્યદમનં કુમ્ભજં મેનિરે યતિમ્ ॥ ૬૯॥

ગરુત્મન્તમિવોદ્યન્તં પક્ષપાતં વિનોર્જિતમ્ ।
વિનતાનન્દનં રઙ્ગશઠજિન્નામ યોગિનમ્ ॥ ૭૦॥

સર્વથાશેષભાવેન દ્યોતમાનં નિજશ્રિયા ।
માધવાર્પિતસર્વાંશં શેષં રઙ્ગશઠદ્વિષમ્ ॥ ૭૧॥

શેષાશનં શ્રીશધર્મનેતારં હરિસમ્મતમ્ ।
તત્સેનાન્યમિવાપ્યન્યં શ્રયે રઙ્ગશઠદ્વિષમ્ ॥ ૭૨॥

અનુષ્ઠિતક્રતુશતં સર્વજ્યૈષ્ઠ્યપદસ્થિતિમ્ ।
યતિં મહેન્દ્રમપરં નરસિંહૈકપાલિતમ્ ॥ ૭૩॥

ધીપ્રચોદનકર્તારં સર્વસન્માર્ગદાયિનમ્ ।
પુણ્ડરીકાક્ષનિલયં સવિતારમિવાપરમ્ ॥ ૭૪ ॥

સુદર્શનં દ્યોતમાનં હરેઃ કરસમુજ્જ્વલમ્ ।
ચક્રેશમિવ યોગીન્દ્રં વિમતાશાવિબાધકમ્ ॥ ૭૫॥

રામાન્વયકરં વિષ્ણુપદદ્યોતિતવિગ્રહમ્ ।
હંસં હંસાન્વયાદીમં ભસ્વન્તમપરં યતિમ્ ॥ ૭૬॥

પાઞ્ચજન્યમિવાશેષમોદાવહશુભદ્ધ્વનિમ્ ।
સતાં જયપ્રદગુણમસતાં ચ ભયાવહમ્ ॥ ૭૭॥

શ્લાઘ્યાભિજનસમ્ભૂતં સદૈવ રમયેક્ષિતમ્ ।
યતિમન્યં કૌસ્તુભઞ્ચ હૃદ્ગતં ચ હરેર્ગુણૈઃ ॥ ૭૮॥

અવિચ્છિન્નગુણં શ્રીમદ્ધરિશાર્ઙ્ગમિવાપરમ્ ।
અવિનાભૂતવિજયં નિત્યશત્રુવિનાશનમ્ ॥ ૭૯॥

સદાધિષ્ઠિતદેવેશં ગુરુદૃષ્ટ્યાભિપાલિતમ્ ।
કૃતપુણ્યૈર્જનૈર્દૃષ્ટં યતિં સ્વર્ગમિવ સ્થિતમ્ ॥ ૮૦ ॥

સરસ્વતીપદમુખં સત્યપાલનતત્પરમ્ ।
સ્વભક્તિતુષ્ટહસ્તીશમન્યં પદ્મભવં યતિમ્ ॥ ૮૧॥

જાહ્નવીતીર્થપૂતાઙ્ગં કલયોલ્લસિતાનનમ્ ।
વિશ્વાતિશાયિસાર્વજ્ઞ્યં ઈશાનમપરં યતિમ્ ॥ ૮૨॥

અમેઘભીતિનિલયમતમસ્સઙ્ગદુઃખિતમ્ ।
અનાભિજાતસંસર્ગં હંસં વન્દે વિપશ્ચિતમ્ ॥ ૮૩॥

અથ તેભ્યો નમોઽપ્યસ્તુ યતીન્દ્રં વિદ્વિષન્તિ યે ।
અત્ર પ્રવૃત્તમનસઃ યૈશ્ચ સન્ધુક્ષિતા વયમ્ ॥ ૮૪॥

યદન્વયાદ્વિશુદ્ધાસ્સ્યુઃ ભક્ત્યા દૂષણયા ધિયા ।
ઉભયે શુદ્ધમનસઃ સ્મરણં તત્ર કારણમ્ ॥ ૮૫॥

વિચાર્ય બુદ્ધ્યાઽમલયા યતીન્દોર્નિર્મલાશયાઃ ।
વૃત્તાબ્ધૌ સન્ત આસાયં નિમગ્ના ભવતશ્રિયૈ ॥ ૮૬॥

અપાપભીરુહૃદયૈઃ અયતીન્દ્રાનુવર્ત્તિભિઃ ।
અનૃસિંહેક્ષિતૈઃ કિં વા સદ્ભિરેવ હિ કેવલૈઃ ॥ ૮૭॥

યસ્મિન્નુપદિશત્યર્થં પ્રણવૈકસમુદ્ધૃતમ્ ।
મેને જનસ્સ્વમાત્માનં જાતં શેષં પુનર્નવમ્ ॥ ૮૮॥

સર્વદ્વિજસમક્ષં હિ કૃતસ્નાનાદિકક્રિયઃ ।

જગદ્ધેતુર્રમાનાથમર્ઘ્યદાનાદિનાર્ચ્યયત્ ॥ ૮૯॥

રવિપ્રભે જપત્યસ્મિન્ પદ્મરાશિસ્સ્મિતાનનઃ ।
સ્વયં ચ નિશ્ચલસ્તસ્થૌ યતિના શિક્ષિતો યથા ॥ ૯૦॥

શુદ્ધભાનુકરાશ્લિષ્ટં લક્ષ્મીનરમૃગેશ્વરમ્ ।
અતોષયત્ત્વભિગમૈઃ પરિવારેણ સંયુગમ્ ॥ ૯૧॥

નિત્યસેવાવિશુદ્ધાત્મભૂમિદેવગણેષ્વસૌ ।
શ્રીભાષ્યામૃતવર્ષાણિ યથા મેઘોઽભ્યવર્ષયત્ ॥ ૯૨॥

ઉચ્ચસ્થેઽથ રવૌ યોગી યોગતુષ્ટરમાપતિમ્ ।
ઇજ્યાઽઽરાધનસન્તુષ્ટં કારયામાસ વાગ્યમી ॥ ૯૩॥

હુતશિષ્ટં યતિઃ સમ્યક્ શિક્યલબ્ધં સુધોપમમ્ ।
પવિત્રમન્નં હાર્દાય ન્યવેદયદ્યથોચિતમ્ ॥ ૯૪॥

અથ દ્વયાર્થવક્તાઽસૌ દ્વન્દ્વાતીતસ્સતાં વ્રજે ।
તોષયામાસ યોગીન્દ્રં શ્રીનૃસિંહશઠદ્વિષમ્ ॥ ૯૫॥

સમક્ષગ્ચ દિનેશસ્ય કૃતસ્નાનો યતીશ્વરઃ ।
સન્દિગ્ધાયાં રવિસ્થિત્યાં નૃસિંહારધને યતઃ ॥ ૯૬॥

લક્ષ્મીનૃસિંહશઠજિદ્યોગીન્દ્રં સંપ્રણમ્ય ચ ।
કટાક્ષામૃતસન્તુષ્ટઃ જયત્યખિલવન્દિતઃ ॥ ૯૭॥

અથ યોગાસને યોગી યોગતુષ્ટનૃસિંહધીઃ ।
શેષિણં જગતાં સ્વસ્ય ધ્યાયતિ શ્રીરમાશ્રયમ્ ॥ ૯૮॥

એવં વિધૈર્બુધાશ્ચર્યૈઃ કૃત્યૈર્હંસૌ પરસ્પરમ્ ।
હર્ષયન્તૌ સદા નમ્રાન્ જીયાતસ્તાં બહુવત્સરાન્ ॥ ૯૯॥

યત્રૈતદ્ધંસયોશ્શુદ્ધપદપઙ્કજરેણવઃ ।
પાવનાસ્સર્વજન્તૂનાં સા ભૂમિર્દ્વારકાદિકા ॥ ૧૦૦॥

શ્રૂયતેહંસયોર્નાદઃ યત્રયદ્વિષયોઽપિ વા ।
સા પ્રાણનાડિવિદ્યાયાશ્શીક્ષાધાયાશ્ચ સમ્પદઃ ॥ ૧૦૧॥

અહો હ્યદૂષયં રઙ્ગશઠજિદ્યોગિવૈભવમ્ ।
યદપારં કલુષયા વાચા ગોષ્પદમભ્રુવમ્ ॥ ૧૦૨॥

નન્દન્તુ સન્તો યદિ વા દૂષયન્તુ કૃતિં મમ ।
ઉભયં ભૂષણં નૈવ પ્રાજ્ઞેતરસમાદરઃ ॥ ૧૦૩॥

જપ્યમેતદ્ધિ વિદુષાં મનોવાગ્વૃત્તભૂષણમ્ ।
ન હિ ત્યજન્તિ વિબુધા વિધું દોષાઞ્ચિતં ક્વચિત્ ॥ ૧૦૪॥

ન ચાર્થતૃષ્ણયા ખ્યાત્યૈ યતીન્દુગુણચન્દ્રિકા ।
તદ્ગુણાવિદુષાં ભક્ત્યા દર્શનાર્થમિયં કૃતિઃ ॥ ૧૦૫॥

શબ્દે સ્વર્ગદુહાનેન સૂરિભિશ્શિક્ષિતા વયમ્ ।
લક્ષ્મીનૃસિંહશઠજિદ્યોગિદૃષ્ટ્યાવિશોધિતાઃ ॥ ૧૦૬॥

તુષ્યત્વનેન વચસા શુભલક્ષ્મીનૃકેસરી ।
લક્ષ્મીનૃસિંહશઠજિગ્યોગીન્દ્રો દૈવતં મમ ॥ ૧૦૭॥

અનુષ્ટુભા પરમયા વાચા સાફલ્યમીપ્સતા ।
શ્રીરઙ્ગશઠજિદ્યોગિવિધોર્વૃત્તં ચ વર્ણિતમ્ ॥ ૧૦૮॥

॥ શુભમસ્તુ ॥

શઠારિલક્ષ્મણમુનીન્દ્રાર્ચ્ચાધીઃ જયતિ શ્રુતઃ ।
લક્ષ્મીનૃસિંહશઠજિત્ ચાપાદિ પ્રોષ્ઠપાદ્ભવઃ ॥

જયત્યુચ્ચૈર્ગુરુશ્શ્રીકૃદ્બુધાશ્લેષસમુન્નતિઃ ।
મકરેઽવતરન્ રઙ્ગશઠજિદ્ધિશ્વદેવભઃ ॥

શ્રીમતે શ્રીમચ્છઠકોપ શ્રીરઙ્ગશઠકોપયતીન્દ્રમહાદેશિકાય નમઃ ॥

ઇતિ આવિયુર્ શ્રીનિવસચાર્યવિરચિતઃ શ્રીપાર્થસારથિસ્તવઃ સમાપ્તઃ ।

End of Part - 4

Encoded by Muthuraman Krishnamurthy

Proofread by PSA Easwaran

*Shri Parthasarathi Stavah*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*